ष्म भवतो वयं यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ४ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं प्रविष्टो ब्रह्म नि स्त
र्वाणमभयं दर्शितं त्वया ५ अनुजानीहि मां ब्रह्मन् वाचं यच्छाम्यधोक्षजे मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्य
सून् ६ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया भवता दर्शितं क्षेमं परं भगवतोपदं ७

च्छ सीति यदुक्तं तत्र सिद्धोहं न किंचित्प्रष्टुमिच्छामि केवलमनुज्ञां देहीत्याह अनुजानीहीति वाचमित्युपलक्षणं
स्त्री सर्वेंद्रियाणां वाचं नियम्य किं करिष्यसि तत्राह मुक्ताः कामाशया यस्तद्रसनाय न तच्चेतो अधोक्षजे प्रवेश्य असून्
विसृजामि ६ ननु किं प्राणत्यागेन कंचित्कालं ज्ञाननिष्ठो भवेति चेत्तिलत्राह अज्ञानं चेति च कारात्संस्काराश्च १६
तं च त्वत्कृपयैवेत्याह भवतेति ७

८॥ आत्मनाबुध्या आत्मानं मनः आत्मनि प्रत्यक् प्रकारो समाधाय परमात्मानं ध्यौ अस्पंदासुः लीनप्राणः यथा तरुः स्थाणुः ९ तमेव विशिनष्टि प्राकुले प्रागग्रे ही बर्हिषि १० तदेवं ब्रह्मभूते तस्मिन् तक्षकागमनादिकं पिष्टपेषणमिवाभवदिति दर्शयति तक्षक इति त्रिभिः हे विप्राः ११ तं विषचिकित्सया परीक्षद्रक्षणेन द्रव्यार्जनाय गच्छंतं तत्रास्थाने ली ढ वट रक्षस्य भस्मीभूतस्य पुनरंकुरादिक्रमेणो स्थापनाद्विषहारिणं तद्पेक्षितैर्द्रविणैः संतर्प्य ततो

सूतउवाच इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः जगाम भिक्षुभिः साकं नरदेवेन पूजितः ८ परीक्षिदपि राजर्षिरात्मन्यात्मानमात्मना समाधाय परं ध्यायन्नस्पंदासुर्यथातरुः ९ प्राकूले बर्हिष्यासीनो गंगाकूल उदङ्मुखः ब्रह्मभूतो महायोगी सग छिन्नसंशयः १० तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना हंतुकामो नृपं गच्छन्ददर्श पथि कश्यपं ११ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणं द्विजरूपप्रतिच्छन्नः कामरूपोदशन्नृपं १२ ब्रह्मभूतस्य राजर्षेर्देहो हिगरलाग्निना बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां १३ हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः विस्मिता ह्यभवं सर्वे देवासुरनरादयः १४ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः ववर्षुः पुष्पवर्षाणि विबुधाः साधुवादिनः १५ जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितं यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः १६

(margin: द नि: … न)

निवर्त्य द्विजरूपेण तिरोहितः सन् अदशत् १२ तत्र पुत्रकृत्यमिव जातमित्याह ब्रह्मभूतस्येति तत्क्षणं सर्वेषां दुःखं ततः परमतुल्सवंमांभ्यां हाहाकार इति १४ प्रासंगिकमाह जनमेजय इत्यादि सर्पाभिचार सत्रे द्विजैः सहवर्तमानो यथावदाजुहाव जुहावेति वा सर्वसर्पावाहने कारणमाह संक्रुद्ध इति १६

कस्मात्तक्षकोन दह्यते स्रुक्त्वाः संत्रोद्विजाः जुहुवुः स्तंभितस्तेन इंद्रेणासौ सर्पः १९ ऋत्विजः प्रतिप्राह सहेंद्रः इंद्रेण स
हितः किमिति न पात्यते २० तद्राज्ञो वचः श्रुत्वा आजुहुवुः सापेक्षेमा श्राक्षानं दर्शयति तक्षकेति इहागत्वा वाश्रुपत
स्वेमरुत्वतामरुद्गणवंताइंद्रेण सह २१ ब्राह्मणैरुक्तैराक्षेपैः परुषवाक्यैः सतक्षकः २२ अंगिरसः पुत्रो बृहस्पतिः
प्राह २३ २४ भवतु नामाजरामरः तथापि पितमारकं भक्ष्यामीति चेत्त प्राह जीवितमिति गतिः परलोकः

१७

सर्पसत्रे समिद्धाग्नौ दह्यमानानां महोरगानां दृष्ट्वेंद्रं भयसंविग्नस्तक्षकः शरणं ययौ १७ अश्रुत्वं तक्षकं तत्र राजा
पारिक्षितो द्विजान् उवाच तक्षकः कस्मान्न दह्येतोरगाधमः तं गोपाययति राजेंद्र शक्रः शरणमागतं तेन संस्तं
भितः सर्पस्तस्मान्नाग्नौ पतत्यसौ १९ पारिक्षित इति श्रुत्वा प्राह द्विज उदारधीः सहेंद्रस्तक्षको विप्रा नाग्नौ किमि
ति पात्यते २० तच्छ्रुत्वाजुहुवुर्विप्राः सहेंद्रं तक्षकं मखे तक्षकाभ्युपतस्वेह सहेंद्रेण मरुत्वता २१ इतिब्रह्मोदि
ताक्षेपैः स्थानादिंद्रः प्रचालितः बभूव संभ्रांतमतिः सविमानः सतक्षकः २२ तं पतंतं विमानेन सतक्षं त
मंबरात् विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः २३ नैष त्वया मनुष्येंद्र वधमर्हति सर्पराट् अनेन पी
तममृतं तन्मथितोऽजरामरः २४ जीवितं मरणं जंतोर्गतिः स्वेनैव कर्मणा राजंस्ततोऽन्यो नान्यस्य प्रदाता
सुखदुःखयोः २५ सर्पचोराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप पंचत्वमृच्छते जंतुर्भुंक्ते आरब्धकर्म तत्
२६ तस्मात्सत्रमिदं राजन् संस्थीयेताभिचारिकं सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते २७

सर्पादिभिः

अतो मुमूर्षोरपि निमित्तापितु दुर्गतिरेमैव नैरलेख्यपि न शङ्कनीयमित्यर्थः २५ कथमन्यः सुखदुःखप्रदाता ना
स्ति सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राह सर्पादिनाजंतुः पंचत्वं मरणं ऋच्छति प्राप्नोतीति यत् तदारब्ध
कर्मैव भुंक्ते स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतंत्रा इति भावः २६ संस्थीयेत समाप्यतां अभिचारादिकं हिंसा
फलं दिष्टं प्राचीनं कर्म अतः सर्पादिषु प्रयुक्तस्य तवाप्ययं नापराध इति भावः २७

१७

कथं

वाक्यत्तिंबृहस्पतिं २८ ननुविदुषामप्येवंसंमोहः यतोब्रह्मकोपाख्य [रि] क्षितोमस्फः जनमेजयकोपाख्यषी
णामित्यादि तत्राह सैषेति तस्यामहत्त्वंदर्शयति अलक्षणा नक्ष्यत इत्यलक्षणाअप्रतर्क्येत्यर्थः कोसावित्यत
आह यया ऽस्मविद्धोरेव आत्मभूताः आत्मांशाभूताः प्राणिनः गुणवृत्तिभिः क्रोधादिभिः भूतेषु देहेषु

इत्युक्तः सतथेत्याह महर्षेर्मानयन्वचः सर्पसत्रादुपरतः पूजयामासवाक्यविन् २८
सैषाविष्णोर्महामायाऽबाधयालक्षणायया मुत्यंत्यस्यैवात्मभूताभूतेषुगुणवृत्तिभिः २९

त्यंति बाध्यबाधकतांव्रजंतीत्यर्थः ननुश्रवणादिना वादिना वाधितया कुतोमोहः स्यात्तत्राह अवा
या धैर्बाधितुमशक्यया ॥ शिवमृडहरशंभो ॥ गोरीहरशंभो ॥ नंदिवर्धनशंभो ॥ नीलकंठहर शंभो ॥

कथं तर्हि माया तत्कार्यनिवृत्तिः स्यात्तत्राह श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भजनात्सर्वानर्थनिवृत्तिरिति श्ला
र्थमुपसंहरति न यत्रेति पंचभिः दंभतिया माया कपटयान यं पुमानित्येवं भूतायां बुध्या सकृत्ल्लिसुमायायामि दु
क्षात त्यर्थः सा आत्मवादे क्रियमाणे आत्मवादिभिर्यत्राभीया न विराजिता न प्रकाशिता किंतु भीतेव स्वकार्यं मोहादिकं अ
कुर्वती कथंचिद्वर्तत इति प्रतिपादितेत्यर्थः तदुक्तं तस्मै नमो भगवते वासुदेवाय धीमहि यन्मायया दुर्जययामां
वदंति जगद्गुरुं विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया विमोहिताः विकत्थंते ममाहमिति दुर्धिय इति किंच थ्यं

४९

न यत्र दंभीत्यभया विराजिता मायात्मवादेऽसकृदात्मवादिभिः न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पवृत्ति यत् विकल्प
३० न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहं तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्स्वयं मुनिः ३१

यद्यस्मिन् तदाश्रयो मायाश्रयो विविधो विवादोऽपि नास्ति विशेषविषयत्वाद्विवादानां तस्य च विशेषातीतत्वादिति भावः सं
कल्पाविकल्पानां विशेषविषयत्वात् ३० किंच सृज्यं कर्म सृजता कारकवर्गेण सह उभयोः सृज्यस्रष्ट्रोः परं साध्यं श्रेयः
फलमपि अतः सृज्यस्रष्टृफलैरन्वितो जीवश्चाहंकारात्मको यत्र नास्ति अत एव उत्सादितो निरस्तो बाध्यबाधको य
स्मिन् तदेतत्स्वयं आत्मस्वरूपमित्यर्थः तत्तस्मिंस्तु मीन् अहंकारादीन् निषिध्य विरमेत् विशेषेण रमेत क्रीडे
दित्यर्थः मुनिर्मननशीलः ३१

१८

यतस्तद्वैष्णवंपदमामनंत्याह परमीति यदेतत्तदेव परंवैष्णवं पदंस्वरूपमामनंति के अतत् आत्मव्यतिरिक्तंउत्सिसृक्षवः त्यक्तुमिच्छ
वः यतः अनन्यसौहृदाः नास्तिअन्यस्मिन्सौहृदंयेषांते कुतः दौरात्म्यंदेहाद्यहंभावंविसृज्यदेहेअहंकाराभावादन्यत्रसौहृदं नास्तिअत
स्त्यक्तुमिच्छवइत्यर्थः कथंनेतिनेतीत्येवं अत्रविद्वदनुभवमपि प्रमाणयति हृदोपगुह्य ध्यानादिनाततः [illegible] समाहितैरवसितंनिश्चि

परंपदंवैष्णवमामनंतितद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्यावसितंसमाहितैः ३२
तएतदधिगच्छंतिविष्णोर्यत्परमंपदं अहंममेतिदौर्जन्यंनयेषांदेहगेहजं ३३ अतिवादांस्तितिक्षेतनावमन्येतकिंचन
नचेमंदेहमाश्रित्यवैरंकुर्वीतकेनचित् ३४ नमोभगवतेतस्मैकृष्णायाकुंठमेधसे यत्पादांबुरुहध्यानात्संहितामध्यगामिमां ३५

तं यद्वा अवसितं अवबद्धं आत्मतयागृहीतमित्यर्थः ३२ एवंप्राप्तावधिकारिणोदर्शयति एतदिति देहजमहमितिगेहजं
ममेति ३३ प्राप्त्युपायमाह अतिवादेति ३४ शास्त्रसमाप्तौगुरुंप्रणमति कृष्णाय व्यासाय अध्यगां गतवानस्मि
अ[illegible]धि
नमइति

इमांसंहितामध्यगामित्युक्तं तत्रपुराणसंहिताविभागंविशेषतो बुभुत्सुर्वेदविभागमपिप्रसंगात्पृथक् पृच्छति पैलादिभिरिति हेसौम्य ३६ तत्रप्रथमंवेदाविर्भावप्रकारमाह समाहितात्मन इत्यष्टभिः ब्रह्मणोहृदियआकाशात्तस्मान्नादोभूत् यःकर्णपुट पिधानेन श्रोत्रवृत्तिनिरोधादस्मदादिष्वपिविभाव्यतेवितर्क्यते ३७ प्रसंगान्नादोपासकानांमोक्षफलमाह यस्यनादस्योपा

शौनकउवाच पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः वेदाश्चकतिधाव्यस्ताएतत्सौम्याभिधेहिनः ३६ श्रीसूतउ

१९ वाच समाहितात्मनोब्रह्मन्ब्रह्मणःपरमेष्ठिनः हृद्याकाशादभून्नादोवृत्तिरोधाद्विभाव्यते ३७ यदुपासनयाब्रह्मन्योगिनो मलमात्मनः द्रव्यक्रियाकारकाख्यंधूत्वायांत्यपुनर्भवं ३८ ततोभूत्त्रिवृदोंकारोयोव्यक्तःप्रभवःस्वराट् यत्तल्लिंगंभ गवतोब्रह्मणःपरमात्मनः ३९ त्य

धू

सनयाआत्मनोमलंधूत्वा अपोह्यकथंभूतंमलंतमाह द्रव्यमधिभूतंक्रियाअध्यात्मंकारकंमधिदैवंएवंत्रिधा भूता आख्यायस्यइति तथातं ३८ त्रिवृत्त्रिमात्रःकंठोष्ठादिभिःउच्चार्यमाणस्योंकारस्याक्षरसमाम्नायांतर्भावान्सूक्ष्म तयालंविशिनष्टि अव्यक्तःप्रभवोयस्यसः तदेवाह स्वराट् स्वतएवहृदिप्रकाशमानः तमेवकार्येणलक्षयति यत्तदिति नपुंसकत्वंलिंगशब्दविशेषणत्वात् ३९ लिंगममेकं १९

नी

कोसौ परमात्मा तमाह । शृणोति । इमं स्फोटमव्यक्तमोंकारं ननु जीवः तं शृणोतु नेत्याह सुप्तश्रोत्रे कर्णपिधानादिना अवृत्ति
केऽपि श्रोत्रे सति जीवस्य करणाधीनज्ञानत्वात् न तदा श्रोता तं तदुपलब्धिस्तु तस्य परमात्मन एवेति भावः ईश्वरस्तु नैवं यतः
शून्यदृक् शून्येऽपीन्द्रियवर्गे दृक् ज्ञानं यस्य तथाहि सुप्तो यदा नादं श्रुत्वा प्रबुध्यते न तदा जीवः श्रोता विलीनेन्द्रियत्वात्
यतो यस्तदा नादं श्रुत्वा जीवं प्रबोधयति स यथा परमात्मैव तद्वत् कोसावोंकारः तं विशिनष्टि साधनेन येन वाक् वे
हस्यती व्यज्यते यस्य ब्रह्मरूपया काशा आत्मनः सकाशात् व्यक्तिः अभिव्यक्तिः ४० किंच स्वधाम्नः स्वस्याश्रयः का

शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् येन वाग् व्यज्यते यस्य व्यक्तिराकाश आत्मनः ४० स्वधाम्नो ब्रह्मणः
साक्षाद्वाचकः परमात्मनः स सर्वमंत्रोपनिषद्वेदबीजं सनातनं ४१ तस्य ह्यासंस्त्रयो वर्णा आकाराद्या भृगूद्वह
धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ४२

रणं यद्ब्रह्म तस्य किंच परमात्मा शब्दतः समस्तदेवतावाचको ऽपीत्याशयेनाह स इति सर्वमंत्राणां उपनिषत् रहस्यं सू
क्ष्मरूपमित्यर्थः तत्र हेतुः वेदानां बीजं कारणं बीजत्वेप्यविकारित्वमाह सनातनं सदैकरूपं तस्य ब्रह्मरूपत्वात् ४१
इदानीं ततः सर्वप्रपंचोत्पत्ति प्रकारमाह त्रयः त्रिसंख्यायुक्ताः भावाः यैरकारोकारमकारैः धार्यंते तत्कारणत्वात्
तानेवाह गुणाः सत्वादयः नामानि ऋग्यजुःसामानि अर्थाः भूर्भुवः स्वर्लोकाः वृत्तयो जाग्रदाद्याः ४२

तस्य हि इति

समा

ततस्तेभ्यो वर्णेभ्यः अक्षराणां म्नायं समाहारं तमेवाह अंतस्था: यरलवा: ऊष्माणः शषसहाः स्वराः आकाराद्याः स्पर्शाः कादयः ह्रस्वदीर्घाश्च आदिशब्दाज्जिह्वामूलीयादयः तदेवलक्षणं स्वरूपं यस्य तं ४३ विभुश्चतुर्मुखस्य रूपो भगवान सृजदिति सर्वत्रैवानुषंगः चातुर्होत्र विवक्षया चत्वारो होत्रोपलक्षितान् सकृत् द्विजश्चातुर्होतारः

२

ततोऽक्षरसमाम्नायमसृजद्भगवानजः अंतस्थोष्मस्वरस्पर्श ह्रस्वदीर्घादिलक्षणं ४३ तेनासौ चतुरो वेदान् चतुर्भिर्वदनैर्विभुः सव्याहृतिकान्सोंकारांश्चतुर्होत्र विवक्षया ४४ पुत्रानध्यापयंस्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ४५ ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ४६ क्षीणायुषः क्षीणसत्त्वान् दुर्मेधान्वीक्ष्य कालतः वेदान्ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतनोदिताः ४७

तैरनुष्ठेयं होत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षया ४४ पुत्रान्मरीच्यादीन् तान्वेदान् ब्रह्मकोविदान् वेदोच्चारणादिनिपुणान् ४५ एवं चतुर्युगप्राप्ताः द्वापरादौ द्वापरमादिर्यस्य तद्लक्षणस्य कालस्य तस्मिन्द्वापरादौ ते वेदविभाग प्रसिद्धः शंतनुसमकाल व्यासावतार प्रसिद्धश्च व्यस्ताः विभक्ताः ४६ तत्र हेतुः क्षीणायुष इत्यादिना न तर्हि पुरुषबुद्धिप्रभवत्वात् अनादरणीयं स्यादित्याशंक्याह हृदिस्थेति तेषु ४७

२०

एवंसामान्यतोवेदविभागक्रममुक्त्वावैवस्वतमन्वंतरे विशेषतोनिरूपयितुमाह अस्मिन्नपीति ४८ असोमायातस्यांशः सत्वंतस्यकलयाअंशेनअवतीर्णःसन् ४९ चातुर्विध्यमेवाह ऋगिति ऋगादिमंत्राणांराशीन्वर्गशः तत्तत्प्रका रेणभेदैरुध्दृत्ययथाऽनेकविधमणिराशेर्मणिगणाः पद्मरागादयोविविच्योध्दियंतेतद्दुध्दृत्य तैर्मंत्रैश्चतस्रः ऋगा

अस्मिन्नप्यंतरेब्रह्मन्भगवाँल्लोकभावनः ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये ४८ पराशरात्सत्यवत्यामंशांश कलयाविभुः अवतीर्णोमहाभागवेदंचक्रेचतुर्विधं ४९ ऋगथर्वयजुःसाम्नांराशीनुध्दृत्यवर्गशः चतस्रःसंहि ताश्चक्रेमंत्रैर्मणिगणाइव ५० तासांचतुरःशिष्यानुपाहूयमहामतिः एकैकांसंहितांब्रह्मन्नेकैकस्मैददौविभुः ५१ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह वैशंपायनसंज्ञायनिगदाख्यंयजुर्गणं ५२ साम्नांजैमिनयेप्राह तथाछंदोगसंहितां अथर्वांगिरसींनामस्वशिष्यायसुमंतवे ५३ पैलःसंहितामूचेइंद्रप्रमितयेमुनिः बाष्क लायचसोप्याहशिष्येभ्यःसंहितांस्वकां ५४

दिसंहिताश्चक्रे ५० तासांसंहितानांमध्येएकैकां ५१ ऋचांसमुदायरूपत्वाद्बह्वृचाख्यांनितरांप्रश्लेष णगद्यमानत्वान्निगदाख्यं ५२ साम्नांसंबंधिनींछंदःसुगीयमानत्वात् छंदोगाख्यांसंहितां ५३ तत्रऋग्वे दशाखाविभागमाह पैलइति स्वसंहितांद्विधाविभज्यइंद्रप्रमितयेबाष्कलायचउचे ५४ श्रीरामशरणं

टी

सबाष्कलोपि स्वसंहितां चतुर्द्ध्व्यस्य बोध्यादिभ्यश्चतुर्भ्यः शिष्येभ्यः आह हे भार्गव ५५ इंद्रप्रमितिरपि स्वां संहितां स्वसुतं मांडूकेयं अध्यापयामास तस्य मांडूकेयस्य शिष्यो देवमित्रः ५६ तत्सुतः मांडूकेयसुतः शाकल्य बास्त्यादिषु चपंच स्वधात्ते तानध्यापयामास सः सर्वः तच्छिष्यः शाकल्य शिष्यः स्वसंहितां त्रेधा विभज्य चतुर्थं वैदिक पदार्थ

२१

चतुर्द्ध्व्यस्य बोध्याय याज्ञवल्क्याय भार्गव पाराशरायाग्निमात्रे इंद्रप्रमितिरात्मवान् ५५ अध्यापयत्संहितां स्वां मांडुकेयमृषिं कविं तस्य शिष्यो देवमित्रो सौभर्यादिभ्य उचिवान् ५६ शाकल्यस्तत्सुतः स्वां तु पंचधा व्यस्य संहितां वात्स्य मुद्गल शालीय गोखल्य शिशिरेष्वधात् ५७ जातूकर्ण्य[illegible]श्च तच्छि[illegible]ष्यः सं निरुक्तां स्वसंहितां बलाक पैज वैताल विरजेभ्यो ददौ मुनिः ५८ बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्य संहितां चक्रे बालायनिर्भज्य कौ[illegible]रश्चैव तां दधुः ५९ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ६०

व्याख्यानरूपं निरुक्तं च कृत्वा बलाकादिभ्यश्चतुर्भ्यो ददौ ५८ बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः प्रतिशाखाभ्यः उक्तसर्वशाखाभ्यः बालायन्यादयस्ता मादधुः अंगीकृतवंतः ५९ [illegible]कृ शाखोपसंहार म[illegible]र्वकं तच्छ्रवणे फलमाह बह्वृचा इति एतच्छंदसां एतेषां छंदसां ६०

२१

त
पो
न

यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह वैशंपायनशिष्या इत्यादिना चरकनाम निरुक्तिमाह यद्यस्माद्धेतोरिति ब्रह्महत्या
रूपमाहः क्षपयतीति तथा स्वस्य गुरोरनुष्ठेयं व्रतं तच्चरणाच्चरकौ इत्यर्थः ६१ तच्छिष्यः वैशंपायनशिष्यः अल्पसाराणामेते आचरितेन कियत् सुदुश्चरं मे चरिष्यामीति ६२ विप्राणामवताअवज्ञाकर्त्रा मत्तोधीतमामुञ्चजेति ६३ मं
देवरातसुतो याज्ञवल्क्यः ६४ यजूंषि तस्या दर्शविप्ररूपेणानुचितमितितित्तिराः पक्षिविशेषा भूत्वा आददुः ततश्च तैत्तिरीया इति प्रसिद्धाः सुपेशलाः अतिरम्याः बहुवचनमवांतरभेदविवक्षया ६५ काण्वमाध्यंदिनादिशाखाप्र

वैशंपायनशिष्या वै चरकाध्वर्यवोभवन् यच्चेरुः ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ६१ याज्ञवल्क्यश्च तच्छिष्यः आहाहो भगवान्कियत् चरितेनाल्पसाराणां चरिष्येहं सुदुश्चरं ६२ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ६३ देवरातसुतः सोपिच्छर्दित्वा यजुषां गणं ततो गतोथ मुनयो ददृशुस्तानू यजुर्गणान् ६४ यजूंषि तित्तिरा भूत्वा तल्लोलुपतया ददुः तैत्तिरीया यजुःशाखा आसन्सुपेशलाः ६५ इति
याज्ञवल्क्यस्ततो ब्रह्मंश्छंदांस्यधिगवेषयन् गुरोरविद्यमानानि सूपतस्थेर्कमीश्वरं ६६

संगमाह याज्ञवल्क्य इत्यादिना गुरो वैशंपायनस्य व्यासेन विभज्यानुक्त्वा दविद्यमानानि अधिका
ज्ञातुमिच्छन् निगवेषयन् मार्गयन् सूपतस्थे सम्यक् तुष्टाव ईश्वरं वेदानां तथा च श्रुतिः ऋग्भिः पूर्वाह्णे दिविदेव
ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्य इति ६६
न ध्या

नमोभगवतेआदित्याय तुभ्यं योभवानेकः सर्वेमांलोकयात्रामनुवहती सन्वयः तदेवदर्शयति अखिलजग
ता मात्म स्वरूपेणांतर्हृदयेषुकालस्वरूपेणवहिरपिवर्त्तमान इति अखिलजगतामित्यस्यप्रपंचः चतुर्विधे
ति हृदयांतर्वर्त्तिखेपिजीववर्त्तनोपधिना अव्ययवधीयमानः अनाच्छाद्यमानः कालस्वरूपेणवस्यस्य प्रपंचः
क्षणेति क्षणलवादयो यव यवास्तैरुपचिताः संवत्सरास्तेषांगणेन प्रयद मपामादानं शोषणंविसर्गोवृष्टिस्ता भ्यां

र कालस्वरूपेण

याज्ञवल्क्यउवाच ॐ नमोभगवतेआदित्यायाखिलजगतामात्मस्वरूपेणकालस्वरूपेणचचतुर्विधभूतनिकायानांब्र
ह्मादिस्तंभपर्यंतानामंतर्हृदयेषुवहिरपिचाकाशइवोपाधिनाव्यवधीयमानोभगवानेकएवक्षणलवनिमि व
षावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमांलोकयात्रामनुवहति ६७ यदुहवावविबु
धर्षभसवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्ज
नभगवतः समभिधीमहितपनमंडलं ६८ ना

भ्यांअनेनगायत्रीप्रथमपादोक्तवरेण्यत्वानुवर्णितो ६७ द्वितीयपादार्थमनुवर्णनेनस्तौति यदुहेतिहेवि
बुधर्षभहेसवितः यद्यस्यदेभगवतस्तवमंडलंतपति ॐ तत्समभिधीमहि सम्यगाभिमुख्येनध्यायेम
पुनस्तस्यैवसंबोधनं प्रत्यहंत्रिषवणंवैदिककर्ममार्गेणस्तवंतांभक्तानांयान्यखिलानिदुरितानितत्फ २२
लानिच वृजिनानिदुःखानितेषांबीजमज्ञानंचतेषामवभर्जनंविनाशकंहेतपनेति ६८

२२

नेव

तृतीयपादेनस्तौति यइहेति योभगवान्स्थावरजंगमसंभृतानांस्वमयाणांजीवानांमनइंद्रियप्राणगणान् अ
नात्मनोजडान्स्वयमात्मैवांतर्यामीसन्प्रचोदयतिप्रवर्त्तयति ६९ तृतीयपादेमंडलस्थपरतयाव्याचक्षाणस्तौति
यएवेति यएकएवभवानतिकरालवक्त्रोयोअंधकारसंज्ञोजगरस्तेनगिलितंअतएवमृतकमिवविचेतनंस्व
धर्माख्यंयदात्मावस्थानंप्रत्यक्प्रवणत्वंतदवश्रयस्तस्मिन्प्रवर्त्तयति किंच योभवानवनिपतितिरिवअटतिगच्छति ७०

व

यइहवावस्थिरचरनिकराणांनिजनिकेतनानांमनइंद्रियासुगणाननात्मनःस्वयमात्मान्तर्यामीप्रचोदयति ६९
यएवेमंलोकमतिकरालवक्त्रांधकारसंज्ञाजगरग्रहगिलितंमृतकमिवविचेतनमवलोक्यानुकंपयापरमकारुणि
कईक्षयैवोत्थाप्याहरह....नुसवनंश्रेयसिस्वधर्माख्यात्मावस्थानेप्रवर्त्तयत्यवनिपतिरिवासाधूनांभयमुदीरयन्नटति ७० परितआशापालैस्तत्रतत्रकमलकोशांजलिभिरुपहृताऽर्हणः ७१ अथहभगवंस्तवचरणन
लिनयुगलंत्रिभुवनगुरुभिरभिवंदितमहमयातयामयजुःकाम उपसरामि ७२

नव

आशापालैरिंद्रादिभिःकमलकोशयुक्तैस्तत्तुल्यैर्वाञ्जलिभि — उपहृतार्हणःदत्तार्घः ७१ यःएवंभूतस्तंअं
अथअतःहस्फुटंअयातयामानि....यैर्यथावदविज्ञातानियजूंषितत्कामोहंउपसरामिभजामि ७२

२३

एवंस्तुतः प्रसादितश्च ७३ पंचदशशाखायाः शतैरपरिमितैः यजुर्भिरकरोत् सतैरितिपाठेसयाज्ञवल्क्यः तैर्यजु
र्भिरकरोदितिजगृहुः अधीतवंतः रश्मिणाअश्वरूपेण वाजेभ्यः केसरेभ्यः वाजेनवेगेन वा संन्यस्ताः त्यक्ताः शाखा
वाजसनीसंज्ञास्ताश्शाखाइतिवा ७४ सामशाखाविभागमाह जैमिनेरिति तत्सुतः सुमंतुसुतः ताभ्यांपुत्रपौ

यां

सूतउवाच एवंस्तुतः सभगवान्वाजिरूपधरोहरिः यजूंष्ययातयामानिमुनयेदात्प्रसादितः ७३ यजुर्भिरक
रोच्छाखादशपंचशतैर्विभुः जगृहुर्वाजसन्यस्ताकाण्वमाध्यंदिनादयः ७४ जैमिनेःसामगःस्यासीत्सुमंतुस्त
नयोमुनिः सुत्वांस्तुतस्सुतस्ताभ्यामेकैकांप्राहसंहितां ७५ सुकर्माचापितच्छिष्यः सामवेदतरोर्महान् सह
स्रसंहिताभेदंचक्रेसाम्नांततोद्विजः ७६ हिरण्यनाभःकौशल्यः पौष्यंजिश्चसुकर्मणः शिष्योजगृहतुश्चा
न्यआवंत्यो ब्रह्मवित्तमः ७७

त्राभ्यांक्रमेणैकांप्राह ७५ तच्छिष्योजैमिनेःशिष्यः महान् अतिमेधावीसहस्रसंहितारूपंभेदंचक्रेससाम्नांत
त्संहिताभेदंततस्तदनंतरं ७६ सुकर्मणःशिष्याएकःकौशल्योहिरण्यनाभः पौष्यंजलिर्नामैकस्तौज
गृहतुः आवंत्योन्यः तस्यैवशिष्यः सोपिजग्राह ७७

२३

प्येष्यंस्या ऽ वंत्ययोरपि चकाराद्धिरण्यनाभस्यापि पंचशतानि शिष्या आसन् तेतावतीः शाखायथा यथ्यं जगृहुः तानुदीच्यान् सतः कालतः कांश्चित्प्राच्यांश्च प्रचक्षितइत्यर्थः यथोक्तं वैष्णवे उदीच्याः सामगाः शिष्यास्तस्य पंच शतंस्मृताः हिरण्यनाभाद्वंत्यः संहितायै द्विजोत्तमैः गृहीतास्तेपि चोच्यंते पंडितैः प्राच्यसामगाइति ७८

उदीच्याः सामगाः शिष्याः आसन्पंचशतानि वै पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान्प्रचक्षते ७८ लौगाक्षिर्मांगलिः कुल्यः कुशीदः कुक्षिरेव च पौष्यंजिशिष्या जगृहुः संहितास्ते शतं शतं ७९ कृतोहिरण्यनाभस्य चतुर्विंशतिसंहिताः शिष्यऊचे स्वशिष्येभ्यः शेषाआवंत्यआत्मवान् ८० इतिश्रीभागवते द्वा० स्कं० वेदशाखाप्रणयनं षष्ठमोध्यायः ६

पुनरप्येतेषांत्रयाणां सुकर्मणः शिष्याणांतरैः प्रशाखाबाहुल्यं दर्शयति लौगाक्षिरितिद्वाभ्यां ७९ कृतोनामहिरण्यनाभस्य शिष्यः स्वशिष्येभ्यः ऊचे शेषाः अन्याः अपि याः प्रसिद्धाः शाखाः आवंत्यः स्वशिष्येभ्यः उवाच इति ८० इति द्वादशटीकायां षष्ठमः ६

सप्तमेऽथर्वविस्तारः पुराणव्यसनं ततः पुराणलक्षणादीनि फलं भागवतश्रुतेः १ क्रमप्राप्तमथर्ववेदविभागमाह शिष्यं कबं
धनामानं स्वकां स्वकीयां संहितां सोपि शिष्यापितं द्विधा विभज्य तदुक्तं वैष्णवे अथर्ववेदं समुनिः सुमंतुरमितद्युतिः शि
ष्यमध्यापयामास कबंधं सोपि तं द्विधा कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवानीति १ स तत्र वेददर्शः स्वसंहितां चतु
र्धा विभज्य चतुरः शिष्यान् अध्यापयामास पथ्यश्च त्रिधा विभज्य त्रीनीति सार्द्धेन आह शौल्कायनिरिति २
अंगिरसः शुनकस्य शिष्यो बभ्रुः सैंधवायनश्च तदुक्तं शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे द्वितीयां संहितां प्रा

२

२४

सूत उवाच अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकां संहितां सोपि पथ्याय वेददर्शाय चोक्तवान् १ शौल्काय
निर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु कुमुदः शुनको ब्रह्मन् जाजलि
श्चाप्यथर्ववित् २ बभ्रुः शिष्योऽथांगिरसः सैंधवायन एव च अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथापरे ३ नक्ष
त्रकल्पः शांतिश्च कश्यपांगिरसादयः एते आथर्वणाचार्याः शृणु पौराणिकान्मुने ४ त्रय्यारुणिः कश्यपश्च
सावर्णिरकृतव्रणः वैशंपायनहारीतौ षड् वै पौराणिका इमे ५ अधीयंत व्यासशिष्यात् संहितां मत्पितुर्मुखा
त् एकैकामहमेतेषां शिष्यः सर्वाः समध्यगां ६

दात् सैंधवायनसंज्ञितः इति सावर्ण्याद्याः सैंधवायनादीनां शिष्याः नक्षत्रकल्पः शांतिकल्पश्चेति द्वौ तदुक्तं
नक्षत्रकल्पो वेदानां संहितानां तथैव च चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचम इति नक्षत्रकल्पादीनां क
र्तारस्तत्तन्नामभिरुच्यते ५ मत्पितुर्मुखादिति प्रथमं व्यासः षट् संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात्
तस्य च मुखादेते त्रय्यारुण्यादयः एकैकां संहितामधीयंत एतेषां षण्णां शिष्योऽहं ताः सर्वाः समधीतवान् ६

२४

राम शिष्योयोकृतव्रणः एवंचत्वारोवयं मूलसंहिताइत्यनेन तत्तः संहिताः बाहुल्यांसुचितं ७ शुकशिक्षितंसंवादेति रूपितमपि पुराणलक्षणं तत्सरकथनायदर्शयति पुराणेति अस्यविश्वस्य अत्रसर्गोविसर्गश्च स्थानंपोषणमूतयेः मन्वंतरेशानुकथा निरोधोमुक्तिराश्रयइत्युक्ते स्थानपोषणेवृत्तिरक्षाशब्दाभ्या मुच्यते अंतराणिमन्वंतराणि वंशोवंशयानुवदितमितिइशानुकथाः संस्थानिरोधः अनेनेवासंतिकलयरूपोमुक्तिरयुक्ता हेतुशब्देनजीवा

कश्यपोहंच सावर्णिः रामशिष्योकृतव्रणः अधीमहिव्यासशिष्याच्चतस्रोमूलसंहिताः ७ पुराणलक्षणंब्र ह्मन्ब्रह्मर्षिभिर्निरूपितं श्रृणुष्वबुद्धिमाश्रित्यवेदशा[…]स्त्रानुसानुसारतः ८ सर्गोस्याथविसर्गश्चवृत्तीरक्षांत राणिच वंशोवंशानुचरितं संस्थाहेतुरपाश्रयः ९ दशभिर्लक्षणैर्युक्तंपुराणंतद्विदो विदुः केचित्पंचविधंब्रह्मन्मह दल्पव्यवस्थया १०

श्चयवासना शब्दवाच्यारूतयोगहीताः दशभिरेतैर्लक्षणैरवैर्युक्तं महापुराणंविदुः केचित्पंचविधं सर्गश्च प्रतिसर्गश्चवंशोमन्वंतराणिच वंशानुचरितंचेति पुराणंपंचलक्षणमिति महत्पुराणं अल्पंचेति व्यव स्थया यत्रदशापिलक्षणानिपृथक्कनिरूप्यंते तन्महापुराणं अत्रत्वन्तेषां पंचस्वेवांतर्भावस्यविवक्षा[…] दल्पमितिव्यवस्थयार्थः १०

अव्याकृतस्य

सर्गादिलक्षणानि व्याचष्टे अव्याकृतेत्यादिना प्रधानस्य गुणानां क्षोभात् यो महान् तस्मात् त्रिवृदहंकारः तस्मा
त्सूक्ष्ममात्राणां इंद्रियाणां च तदर्थानां च स्थूलानां तद्देवतानां च संभवः सर्गः कारणसृष्टिः उच्यत इति अस्य यथापूर्वश्लों
मुत्तरत्राप्यनुषंगः ११ विसर्गं व्याचष्टे पुरुषेणेश्वरेणानुगृहीतानां पूर्वकर्मवासनाप्रधानोयं समाहारः कार्यभूत
श्चराचरप्राणिरूपो बीजाद्बीज[illegible]प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः १२ चराणां भूतानां सामान्यतो चे

अव्याकृतगुणक्षोभान्महतस्त्रिवृतोहमः भूतसूक्ष्मेंद्रियार्थानां संभवः सर्ग उच्यते ११ पुरुषानुगृहीताना
मेतेषां वासनामयः विसर्गोयं समाहारो बीजाद्बीजं चराचरं १२ वृत्तिर्भूतानि भूतानां चराणामचराणि च
कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे तिर्यङ्मर्त्यर्षिदेवेषु हन्यंते
यैस्त्रयीद्विषः १४

राणि च काराच्चराणि च कामाद्वृत्तिः तत्र तु नृणां स्वेन स्वभावेन कामान् चोदनयापि वा या नियता वृत्तिर्जीविका
कृता सा वृत्तिरुच्यत इत्यर्थः १३ तिर्यङ्मर्त्यर्षिदेवेषु ये च्युतावताराः तेषां इहा लीला सा विश्वस्य रक्षोच्यत
इत्यर्थः यैरवतारैरिति समासान्निःकृष्य कथंचित्संबंधः त्रयीद्विषो दैत्याः १४

षड्विधंमन्वंतरमुच्यते षड्विधत्वमेवाह मनुरिति मन्वादयः षडेतेवर्गाः स्वस्वाधिकारेणयत्रवर्त्तंते तन्मंतरमित्य
र्थः १५ वंशमाह ब्रह्मणः सकाशात्प्रसूतिर्येषांभुभुजांनामित्यर्थः तेषामन्वयोवंशः तेषांवृत्तंयेचतद्वंशधरास्ते
षांचवृत्तंवंशानुचरितमाह १६ अस्यविश्वस्य स्वभावतोमायातोनिष्पन्नस्य यद्वामायातोयश्चतुर्विधोलइति १७
अस्यजगतः सर्गादिहेतुर्न्निमित्तंजीवः सोत्रहेतुरुच्यतइत्यर्थः तस्यनिमित्तमाह अविद्याकर्मकारकः कं

मन्वंतरंमनुर्देवामनुपुत्राःसुरेश्वराः ऋषयोंशावतारश्चहरेःषड्विधमुच्यते १५ राज्ञांब्रह्मप्रसुतानांवंशस्त्रैका
लिकोन्वयः वंशानुचरितंतेषांवृत्तंवंशधराश्चये १६ नैमित्तिकःप्राकृतिकोनित्यआत्यंतिकोलयः संस्थेति
कविभिःप्रोक्ताचतुर्धास्यस्वभावतः १७ हेतुर्जीवोस्यसर्गादेरविद्याकर्मकारकः यंचोशायिनंप्राहुरव्याकृतमु
तापरे १८ व्यतिरेकान्वयोयस्यजाग्रत्स्वप्नसुषुप्तिषु मायामयेषुतद्ब्रह्मजीववृत्तिष्वपाश्रयः १९

कर्मकर्त्ताजीवोदृष्टप्रयुक्तःस्वाद्दिश्यस्वसर्गादेः सतुतत्रहेतुरित्यर्थः नत्वनुशायीनिमित्तमितिकेचित् अव्याकृ
तमित्यपरे तत्राहमितिचैतन्यप्रधान्येनानुशायिनंउपाधिप्राधान्यविवक्षयाअव्याकृतं १८ अपाश्रयमाह
व्यतिरेकेति जाग्रदादिष्ववस्थासुजीवतयावर्त्ततेइति जीववृत्तयोविश्वतेजसप्राज्ञास्तेषु मायामयेषुसाक्षि
तयान्वयःसमाध्यादौव्यतिरेकोयस्यतद्ब्रह्मसंसारभ्रांतीतिबाधयोरधिष्ठानावधिभूतमपाश्रयउच्यतइत्यर्थः १९
च

तदेव सदृष्टांतं प्रपंचयति पदार्थेषु घटादिषु द्रव्यं मृदादि यथा युतं अन्वितं अयुतं च बहिरप्यवस्थात् रूपनामसु तन्मात्रं
सत्तामात्रं यथा एवं बीजं गर्भाधानादि यासां पंच तावंतो यासां तासु देहावस्थासु नवस्वपि अधिष्ठानत्वेन च युतमयुतं
चयत् तद्रूपाश्रय इति २० एवं दशापि लक्षणानि व्याख्याय वर्णयति महात्मन इति मदुक्तं तदाह विरमेति यदा सर्गादीनां
मायामयत्वानुसंधानेन वामदेवादीरिव स्वयमेव चित्तं विरमेत् इद्रुवानुष्ठितेन योगेन वा स्वेहत्यादिवत् तदा विक्षेपाभावात्

पदार्थेषु यथा द्रव्यं तन्मात्रं रूपनामसु बीजादिपंचतांतासु ह्यवस्थासु युतायुतं २० विरमेत यदा चित्तं हित्वा वृत्तित्रयं
स्वयं योगेन वा तदात्मानं वेदेहाया निवर्तते २१ एवं लक्षणलक्षणि पुराणानि पुराविदः मुनयोष्टादश प्राहुः क्षुल्लकानि महांति च २२ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं नारदीयं भागवतमाग्नेयं स्कंदसंज्ञितं २३ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनं वाराहं मात्स्यं कौर्मं च ब्रह्मांडाख्यमिति त्रिषट् २४ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः
शिष्य० शिष्यप्रशिष्याणां ब्रह्मतेजोविवर्द्धनं २५ इति श्रीभागवते द्वादश० वेदशाखाप्रणयनं सप्तमोध्यायः ७

३।

दात्मानं वेद तदा च विद्यानिवृत्तेरीहायाः निवर्तत इत्यर्थः २१ पुराणविभागप्रस्तावेन तल्लक्षणादि प्रासंगिक
मुक्त्वा प्र०। स्वतमाह एवंविधैर्लक्षणैर्लक्ष्याणि २२ त्रिषट् अष्टादश २४ उपसंहरति ब्रह्मन्निति मुनेर्व्यासस्य
शिष्यादीनां ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्द्धनं श्रोतॄणामिति शेषः २५ इति द्वादशे सप्तमः ७

संसाररूपायाः

अथ मे तु ते पश्य यो मार्कंडेयस्य मोहकैः कामादिभिरसंमोहो नरनारायणस्तुतिः १ पुराणविभागप्रसंगेन पुराणकर्तुः
मार्कंडेयस्य चरितं प्रस्तुतमाह सूतेति त्वमेव वक्तुं योग्य इत्याह तमसीति संसारे भ्रमतो पारदर्शनि स्तं निवर्त्तकः १
वक्तव्यमाह आहुरिति उर्वरितो अवशिष्टो येन कल्पांतेन एतत्कथं घटेत इत्येकः प्रश्नः २ प्रलयाभावादप्येतत्तन्न
घटत इत्याह यतो भार्गवर्षभः कोपि प्राकृतिको नैमित्तिको वा ३ अन्यदप्यघटितमेवेत्याह एक एवेति तोकं बालकं

शौनक उवाच सूत जीव चिरं साधो वद नो वदतां वर ॥ तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः १ आहुश्चिरायुषमृ
षिं मृकंडुतनयं जनाः यः कल्पांते उर्वरितो येन ग्रस्तमिदं जगत् २ स वा अस्मत्कुलोत्पन्नः कल्पेस्मिन्भार्गवर्षभः
नैवाधुनापि भूतानां संप्लवः कोपि जायते ३ एक एवार्णवे भ्राम्यन्ददर्श पुरुषं किल पटपत्रपुटे तोकं शयानं त्वेक
मद्भुतं ४ एष नः संशयो भूयान्सूत कौतूहलं यतः तं नश्छिंधि महायोगिन्पुराणेष्वपि संमतः ५ सूत उवाच
प्रश्नस्त्वया महर्षेयं कृतो लोकभ्रमापहः नारायणकथा यत्र गीता कलिमलापहा ६

कौतूहलं औत्सुक्यं तं संशयं न केवलं त्वं महायोगी किंतु पुराणेष्वपि तात्त्वेन संमतः ५ प्रश्नमभिनंदति हेम
हर्ष अयं प्रश्नः तत्र हेतुः नारायणेति यत्र प्रश्नविषये ६

२७ र्मा

तत्र मार्कंडेयस्तपसा भगवंतं आराध्य मायाप्रदर्शनं वव्रे तत्र च तेन वै भगवन्मायया सप्तकल्पांता दृष्टा नान्यैरित्युत्तरं वक्तुं आदितः आरभ्य तस्य चरितमाह प्राप्तेत्यादिना मार्कंडेयो मृत्युं जिग्ये इति पंचमश्लोकेनान्वयः मध्यमग्रंथेन तत् स्वधर्मः कथ्यते प्राप्तद्विजाति संस्कारः उपनयनाख्यो येन सः पितुः सकाशात् गर्भाधानादि क्रमात् छंदांसि वेदान् ७ बृहद्व्रतधरः नैष्ठिकब्रह्मचारी सन् ८ नियमर्द्धये धर्मवृद्धये अग्न्यादिषु पंचसु हरिमर्चयन् ९ भैक्ष्यं गुर्वर्थमाह

प्राप्तद्विजातिसंस्कारो मार्कंडेयः पितुः क्रमात् छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ७ बृहद्व्रतधरः शांतो जटिलो वल्कलांबरः बिभ्रत्कमंडलुं दंडमुपवीतं समेखलं ॥८॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमैः युतः अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययोर्हरिं ९ सायंप्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः १० एवं तपःस्वाध्यायपरो वर्षाणामयुतायुतं आराधयन्हृषीकेशं जिग्ये मृत्युं सुदुर्जयं ११ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च येऽपरे नृदेवपितृभूतानि तेनासन्नतिविस्मिताः १२ इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः दध्यावधोक्षजं योगी ध्वस्तक्लेशांतरात्मना १३

हृत्य तेनानुज्ञातश्चेत्तर्हि बुभुजे नोचेत्सकृत्कदाचिदुपोषितो भवति १० ११ तेन मृत्युंजयेन ध्वस्ताः क्लेशा रागादयो यस्य तेन अंतरात्मना प्रत्याहृतेन मनसा

२७

तस्य तपोनिष्ठामितिहासेन वर्णयति एतदित्यादिना अस्मिन्सप्तमे मन्वंतरे तपसा मत्पदं ग्रहीष्यतीति तिचिंतितः १५ मुनये मुनिं भ्रंशयितुं रजस्तोकं अतिप्रियमस्य लोभमदर्शयत् १६ तदाश्रमपदं प्रविष्टो वायुर्वावर्धितः तीयेनान्वयः पुण्यैर्द्रुमैर्लताभिश्चार्चितं पूजितं पुण्यद्विजानामृषीणां कुलैराकीर्णं पुण्या अस्यमला जलाशया

तस्यैवं युंजतश्चित्तं महायोगेन योगिनः व्यतीयाय महान्कालो मन्वंतरषडात्मकः १४ एतत्पुरंदरो ज्ञात्वा सप्तमेस्मिन्कालांतरे तपोविघ्नं कितो ब्रह्मन्नारेभे तद्विघातकं १५ गंधर्वाप्सरसः कामं वसंतमलयानिले मुनये प्रेषयामास रजस्तोकमदौ तथा १६ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे पुष्पभद्रा नदी यत्र चित्राख्या च शिला विभो १७ तदाश्रमपदं पुण्यं पुण्यद्रुमलतान्वितं पुण्यद्विजकुलाकीर्णं पुण्यामलजलाशयं १८ मत्तभ्रमरसंगीतं मत्तकोकिलकूजितं मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलं १९ वायुः प्रविष्ट आदाय हिमनिर्झरशीकरान् सुमनोभिः परिष्वक्तो ववावुत्तंभयन्स्मरम् २०

यस्मिन् १८ मत्तभ्रमराणां संगीतं यस्मिन् मत्तकोकिलानां कूजितं यस्मिन्मत्तान्बर्हिण एव नटास्तेषामाटोपः संभ्रमो यस्मिन् मत्तद्विजानां पक्षिणां कुलैराकुलं व्याप्तं १९ एवंभूतं तदाश्रमपदं प्रविष्टः सन् वायुर्मलयानिलो ववौ प्रससार उत्तंभयन् उद्दीपयन् तत्र रक्षेषु प्रवेशान्मांद्यं हिमनिर्झरकणानां शैत्यं पुष्पपरिष्वंगात्सौगंध्यं चोक्तं २०

२८

लताश्चे

किंच उपघ्नद्रो यस्मिन् तन्निम्नावक्रं रजनीमुखं यस्मिन् सः प्रवालस्तवकानां मालयः श्रेण्यो येषां तैः स्तुब्यंति विटपैः संश्लिष्यंतीति गोपाद्रुमाश्च तेषां जालैः समूहैः आविर्बभुव २१ किंच तद्गीतवादित्रयूथकैः गायकादिसमुदाय भिः गंधर्वैरन्वीयमानैः तथा स्वः स्त्रियो अप्सरसस्तासां यूथपतिः आत्तचापेक्षु[illegible]येणसः स्मरश्च तत्राद रयत २२ दुराधर्षं अभिभवितुमशक्यं २३ २४ शोषणदीपनसंमोहनतापनोन्मादनाख्यानि पंचमुखानि य

उपघ्नं द्रोनिम्नावक्त्रः प्रवालस्तवकालिभिः गोपद्रुमलताजाले स्तत्रासीत्कुसुमाकरः २१ अन्वीयमानो गंधर्वैर्गीतवादित्रयूथकैः अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः २२ हुताग्निं समुपासीनं रुद्रमुग्रं त्रिककिंकराः मीलिताक्षं दुराधर्षमस्त्रिमंतमिलानले २३ ननृतुस्तस्य पुरतः स्त्रियो योगायकाजगुः मृदंग वीणापणवैर्वाद्यं चक्रुर्मनोरमं २४ संदधे स्वं स्वधनुषि कामः पंचमुखं तदा मधुर्मनोरजः स्तोक इंद्रभस्याव्य कंपयन् २५ क्रीडंत्याः पुंजिकस्थल्याः कंदुकैः स्तनगौरवात् भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः २६ इतस्ततो भ्रमद्दृष्टेश्चलंत्या अनुकंदुकं वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलं ॥२७ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः २८

स्य तदस्त्रं संदधे तदेव मधुर्वसंतः रजस्तोकश्च पुंस्त्वमार्षं अन्ये चंद्रमस्याः तस्य मनो व्य[illegible]कंपयन् २५ किंच वायुर्मलयानिलः पुंजिकस्थल्याः तत्सूक्ष्मं वासो जहार २७ सर्वं तेषां कर्म तत्र तस्मिन्मायं व्यर्थं अनीशस्य निर्दैवस्य यथा उद्यमः २८ २८

उपवीतकादिन्दधानौ जंतुमार्जनं सूक्ष्मजंत्वादिमार्जनं २

मुनेरपकुर्वंतः प्रतिकूलमाचरंतः हेमुने २९ अहमः अहंकारस्वभावं विकारं ३० निस्तेजसं म्लानवदनं स्वराडिंद्रः ३१ नरनारायणरूपोहरिः ३२ तावनुवर्णयति द्वाभ्यां रौरवं कृष्णाजिनं वल्कलं चांबरं ययोस्तौ पवित्रपाण्योः ययोस्तौ त्रिवृत्त्रिगुणं नवतंतुकमिति यावत्त्रिवृद्वृहिपच्यमानमित्याहोनवतं स्वादिमयं ३३ वेदंचधर्ममुष्टिं [illegible]च साक्षात्तप

तरस्तमपकुर्वंतोमुनेस्तत्तेजसामुने दह्यमानानिववृतुःप्रबोध्याहिमिवार्भकाः २९ इतींद्रानुचरैर्ब्रह्मन्धर्षितोपिमहामुनिः यन्नागादहमोभावंनतच्चित्रंमहत्सुहि ३० दृष्ट्वानिस्तेजसंकामंसगणंभगवान्स्वराट् श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयंसमगात्परं ३१ तस्यैवंयुंजतश्चित्तंतपःस्वाध्यायसंयमैः अनुग्रहायाविरासीन्नरनारायणोहरिः ३२ तौशुक्लकृष्णौनवकंजलोचनौचतुर्भुजौरौरववल्कलांबरौ पवित्रपाणीउपवीतकंत्रिवृत्कमंडलुंदंडमृजुंचवैणवं ३३ पद्माक्षमालामुतजंतुमार्जनंवेदंचसाक्षात्तपएवरूपिणौ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशूदधानौविबुधर्षभार्चितौ ३४

एवतोतत्रहेतुः तपत्तडिद्वर्णं दीप्यमानविद्युत्संकाशं यत्पिशंगं रोचिस्तेन रूपिणौ मूर्तिमंतौ तादृक्तेजोयुक्तमूर्तिभ्यां तपोमयत्वेन प्रकाशमानावित्यर्थः प्रांशू उन्नतौ ३४ श्रीरामकृष्णगोपाल

उच्चैर्महता आदरेण ३५ तयोः संदर्शनेन य आनंदस्तेन निर्वृता उपशांता आत्मेंद्रियाशयाः देहेंद्रियमनांसि यस्य सः
न सेहे नाऽशक्नोत् ३६ आश्लिषन् आलिंगयन्निव पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन अर्घेण ३८ पादावान
म्य गरिष्ठौ पूज्यतमौ तौ प्रति ३९ अंतर्यामिणस्तस्यैव प्राणादिप्रवर्तकत्वादात्मनस्तु [illegible]तावस्वातंत्र्यं पश्यन्नाह
किमिति हे विभो तव त्वां किं वर्णये कथं स्तौमि य[illegible]न त्वयैव उदीरितः प्रेरितोऽसुः प्राणः स स्पंदते प्रवर्तते त[illegible]दये

२९

तेवै भगवतो रूपे नरनारायणावृषी दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ३५ स तत्संदर्शनानंदनिर्वृतात्मे
द्रियाशयः हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं ३६ उत्थाय प्रांजलिः प्रह्वः औत्सुक्यादाश्लिषन्निव नमो
नम इतीशानौ बभाषे गद्गदाक्षरः ३७ तयोरासनमादाय पादयोरवनिज्य च अर्हणेनानुलेपेन धूपमाल्यै
रपूजयत् ३८ सुखमासीनावासीनौ प्रसादाभिमुखौ मुनिः पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ३९
मार्कंडेय उवाच किं वर्णये तव विभो यदुदीरितोऽसुः संस्पंदते तमनु वाङ्मन इंद्रियाणि स्पंदंति वै तनुभृतामज
शर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः ४०

रा

मनु च वागादयः स्पंदंति अत्र हेतुः वै अन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादिश्रुतिभिश्च तत्प्रसिद्धमित्यर्थः
न केवलं प्राकृतानां तनुभृतां किंतु अजशर्वयोश्च अतः स्वस्य ममापि तथैव एवं यद्यपि न कस्यचिदपि कस्यापि स्वातंत्र्यं
अथापि हारुयं त्ववत् प्रवर्त्तितैरपि वागादिभिर्भजतां पुंसां भावबंधुः आत्मबंधुरसि न तु पित्रादिवद्देहमात्रबंधुः अहो कृ

२९

ननु कथमावां ब्राह्मणादि प्रवर्तकौ धर्मपुत्रत्वात् द्वयोरिति चेत्तत्राह मूर्तीरिति हे भगवन् भगवतस्तव इमे मूर्तीस्त्रि
लोक्याः क्षेमाय पालनाय तापविरमाय दुःखनिरसाय मृत्युजित्यै मोक्षाय च न तु त्वं कस्यापि पुत्र इत्यर्थः तत्र दृष्टांतः
व यथेदं विश्वमवितुं अन्यास्तनूर्मत्स्यकूर्मादिलक्षणाः नाना अनेकप्रकाराः बिभर्षीति हेतुः न केवलं पालनादिमात्रं
तव कर्म किंतु सृष्टिलयावपीत्याह सृष्ट्वेति तत्राप्यन्यनिरपेक्षत्वे दृष्टांतः ऊर्णनाभिरिवेति ४० यस्मादेवंभूत

मूर्तीरिमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै नानाविभर्ष्यवितुमन्यतनूर्यथेदं
सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ४१ तस्यावितुः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरुजः स्पृ
शंति यद्वै स्तुवंति निनमंति यजंत्यभीक्ष्णं ध्यायंति वेदहृदया मुनयस्तदाप्त्यै ४२

त्वं तस्मात्तवांघ्रिमूलं भजामीत्याह तस्येति तस्यावितुः पालकस्य स्थावरजंगमानामीश्वरस्य भजामीति अंघ्रीमूलमहं
तृतीयश्लोकस्यानुषंगः कथंभूतमंघ्रिमूलं यत्स्थं यत्र स्थितं कर्मगुणकालानां रजो मलं अन्ये च पूर्वोक्ता
स्तापादयो न स्पृशंति रुजा इति वा पाठः यतः वेदो हृदये येषां ते वेदतात्पर्यविदो मुनयः यदेवं स्तुवंति नितरां नमंति
तत् तत्प्राप्तये एवं स्तवनादि कुर्वंति ४२

तव

यतः अन्यः पुरुषार्थो नास्तीत्याह नान्यमिति अपवर्गेण मच्चरणप्राप्तेः अन्यं क्षेमं न विद्मः परितः सर्वत्र त्रिलोकेषु भीर्यस्य तस्य जनस्य तदेवाह द्विपरार्ध्यधिष्ण्यः स्थानं यस्य सः ब्रह्मा तत्पतेः कालस्य त्वद्भ्रू विजृम्भण रूपात् कालात् इदं विभेति अतः किमु वक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ४३ यस्मादेवं तस्मात् तव पादमूलं भजामि कथंभूतस्य ऋतधियः सत्यज्ञानस्वरूपस्य यद्वा सत्या धीर्यस्य यस्मिन्वा तस्य आत्मगु

३०

ब्रह्मा

नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितो भिय ईश विद्मः ॥ ब्रह्मा विभेत्यलमतो द्विपरार्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानां ४३ तद्भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य देहाद्यपार्थमसदन्त्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थं ४४

रोर्जीवस्य नियंतुः अतः कारणात् ईश्वरस्य किं कृत्वा आत्मच्छदि आत्मावरकं अपार्थं च निष्फलं असत् इदं अचेत संत नश्वरं इदं देहादि हित्वा देहादिभिर्जनैस्त्यक्तो असचेत् कथं प्रतीयेत तत्राह अभिज्ञमात्रं नश्यत्स्वपि तत्पस त् किंत्वात्ममात्रं न ततः पृथगस्तीत्यर्थः नचापवर्गाय भवतु मद्भजनं फलांतरार्थं त्वन्यभजनं कार्यमेव तत्राह तर्हीति यदि त्वां भजंति पुरुषास्तर्हि ते त्वत्तः एव सर्वमनीषितमर्थं विंदंतेति ४४

३०

ननुब्रह्मरुद्रावपि ममैवमूर्त्ती अतोमामेव किमंसुंतमाद्रियसेतत्राह सत्त्वमिति यद्यपियद्यपितवैवमायाकृता एतालीलाः
त्वयैवधृताः तथापियासत्त्वमयी सैवचप्रशांत्यै मोक्षायनकेवलं अस्यप्रशांत्यै भावमात्रमन्यभजने किंस्यन्निष्ठंच
किंतदनिष्टंभवेदित्याह व्यसनेति ४५ तदेवसदाचारेण द्रढयति तस्मादिति हेभगवन् तवशुक्लांततनुंश्रीनाराय

सत्त्वंरजस्तमइतीशतवात्मबंधो मायामयाः स्थितिलयोदयहेतवोस्य लीलाधृतायदपिसत्त्वमयीप्रशांत्यैना
न्येनृणांव्यसनमोहभियश्चयाभ्यां ४५ तस्मात्तवेहभगवन्नथतावकानांशुक्लांततनुंस्वदयितांकुशलाभजंति
यत्सात्वताःपुरुषरूपमुशंतिसत्त्वंलोकोयतोऽभयमुतात्मसुखंचनान्यत् ४६ तस्मैनमोभगवतेपुरुषाय
भूम्नेविश्वायविश्वगुरवेपरदेवताय नारायणायऋषयेचनरोत्तमाय हंसायसंयतगिरेनिगमेश्वराय ४७

णाख्यां अथवातावकानांचशुक्लांततुंनराख्यां यद्यस्मात् सात्वताः सत्त्वमेवपुरुषे [illegible] श्वरस्यरूपमुशंति
मन्यंतेनत्वन्यत् रजस्तमश्चेति अत्रहेतुः यतः सत्त्वात् लोको वैकुंठाख्यः लोकत्वेसत्यप्यभयंच भोगेसत्यप्या
त्मसुखंच ४६ अतस्तंप्रणमति तस्मैनमइति हंसायशुद्धाय संयतगिरेनियतवाचे अथवा निगमेश्वरायवेदमार्ग
प्रवर्त्तकाय ४७

वेदार्थसंप्रदायप्रवर्त्तनेहेतुस्त्वंवदन्स्तौति यमिति कुपटेंद्रियमार्गैर्भ्रमद्धीः विक्षिप्तबुद्धिः पुमान्स्वेंद्रियादिषुनियं
तत्वेनसंतमपि यंत्वांनवेद कथंथेषुविषयेषु बुद्धिविक्षेपेहेतुः तन्मायया तस्यतवैवमायया आवृतात्म निष्ठा
मतिर्यस्यसः सउसोपिआद्यएवपूर्वमितानयैवअखिलगुरोस्तवतत्प्रवर्त्तितंवेदमुपसाद्यप्राप्यतंत्वांसाक्षाद्वेद ४८
वेदनैवत्वज्ञानमिसुरूपपादयन्प्रणमति यस्यतवदर्शनं निगमे भवतिकथंभूतं आत्मनस्तवरहस्यप्रकाशकं

३१

घम

यंवैनवेदवितथाक्षिपथैर्भ्रमद्धीः संतंस्वखेषुसुहृष्वपिदुष्पथेषु तन्माययावृतमति ईसउएवसाक्षादाद्य
स्तवेखिलगुरोरुपसाद्यवेदं ४८ यद्दर्शनंनिगमआत्मरहःप्रकाशं मुह्यंतियत्रकवयोऽजपरायतंतः तंसर्व २।
वादविषयप्रतिरूपशीलं वंदेमहापुरुषमात्मनिगूढबोधं ४९ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधे
मार्कंडेयोपाख्यानेभगवत्स्तुतिर्नामोध्यायः ८

अन्यथादुर्ज्ञेयतामाह अजपराः ब्रह्ममुख्याः कवयोपिसांख्ययोगादिभिर्यतमानाः यत्रत्वयिमुह्यं
ति कुतइत्यतआह सर्वेषांसांख्यादिवादानांविषयाभेदाद्यस्तेषांप्रतिरूपस्तत्तदनुसारिशीलंस्व ३१
भावोयस्यतं कुतः आत्मनादेहादिसंघातेननिगूढोबोधोयस्यतं एवंभूतंमहापुरुषंत्वांवंदे ४९
इतिश्रीभागवतेद्वादशस्कंधेअष्टमोध्यायः ८

नवमेभगवन्मायादिदृक्षोर्दर्शनंमुहुः मायाशिशोर्लया श्चोचमुनेर्निर्वर्ण्यतेनिगमैः १ भगवतः परितोषपूर्वकंतदपेक्षितवरदानंकथयितुमाह संस्तुतइत्यादिना ६ आत्मसमाधिना चित्तैकाग्र्येण २ वयंतेपरितुष्टाः स्मेति बहुवचनंसर्वदेवाभिप्रायेण वरदेशादित्येकवचनं द्वयोरेकाभिप्रायेण प्रतिच्छ गृहाण ३ वरेणच्छंदयता त्वयाजितं उत्कर्षेदर्शितः निर्वि

सूतउवाच संस्तुतोभगवानित्थंमार्कंडेयेनधीमता नारायणोनरसखः प्रीतआहभृगूद्वहं १ श्रीभगवानुवाच भोभोब्रह्मर्षिवर्योसिसिद्धआत्मसमाधिना मयिभक्त्यानपायिन्यातपःस्वाध्यायसंयमैः २ वयंतेपरितुष्टाःस्मत्वद्बृहद्व्रतचर्यया वरंप्रतीच्छभद्रंतेवरदेशादभीप्सितं ३ ऋषिरुवाच जितंतेदेवदेवेशप्रसन्नार्तिहराच्युत वरेणैतावतालंनोयद्भवान्समदृश्यत ४ गृहीत्वाजादयोयस्यश्रीमत्पादाब्जदर्शनं मनसायोगपक्वेनसभवान्मेक्षगोचरः ५ अथाप्यंबुजपत्राक्षपुण्यश्लोकशिखामणे: द्रक्ष्येमायांययालोकःसपालोवेदसद्भिदं ६ सूतउवाच इतीडितोर्चितःकाममृषिणाभगवान्मुने तथेतिससमयन्प्रागाद्बदर्याश्रममीश्वरः ७

ममतुवराकांक्षानास्तीत्याह वरेणेति ४ यस्यतवश्रीमत्पादाब्जदर्शनं तन्मनसापि गृहीत्वा प्राप्यप्राकृता [illegible] अजादयोभवंतिसभवान्मेक्षगोचरोजातोस्ति किमतः परंवरेणेत्यर्थः ५ द्रष्टुमिच्छामि लोकपालैर्ब्रह्मादिभिः सहितोयंलोकः जनःसद्भिदं [illegible] निवस्तुनिभेदंययेति तथेतिद्रक्ष्यसीतिसईश्वरः स्मयन् [illegible] पाठांतरे

तमेवार्थंमायादर्शनरूपं अग्न्यादिमन्तिषु ८ भावद्रव्यैर्मनोमयैर्द्रव्यैः कचित्कदाचित् प्रेमप्रसरसंप्लुतः प्रमोद्रेकं
प्राप्तः ९ मायादर्शनमाह तस्येत्यादिना १० तं वायुमनु वलाहकामेघाश्चाभवन् आविर्बभूवुः ते च तडिद्भिः सहिताः
उच्चैः स्वनंतो गर्जंतः अक्षोरथांगं तेन्नुस्यविष्टाः अभितो बधारामुमुचुः ११ चतुर्दिक्षु वर्त्तमानाः समुद्राः
समीरवेगेनोर्मयस्तैर्भूतलं ग्रसंतः उग्रानक्राः येषु महाभया आवर्त्ता येषु गंभीरो घोषा येषु ते च ते ... १२

३२

मे
तमेव चिंतयन्नर्थमृषिः श्वाश्रम एव सः वसन्नग्न्यर्कसोमांबुवायुविप्रात्मसु ८ ध्यायन्सर्वत्र च हरिं भावद्रव्यै
रपूजयत् कचिन्नृजां विसस्मार भक्तिप्रसरसंप्लुतः ९ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुने उपासीनस्य संध्या
यां ब्रह्मन्वायुरभून्महान् १० खं चंडशब्दं स्वमुदीरयंतं बलाहका अन्वभवन्कराला: अक्षस्थविष्टामुमुचुस्तडि
द्भिः स्वनंत उच्चैरभिवर्षधाराः ११ ततो व्यदृश्यंत चतुः समुद्राः समंततः क्ष्मातलमाग्रसंतः समीरवेगोर्मिभिरु
ग्रनक्रमहाभयावर्त्तगभीरघोषाः १२ अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभीरुपतापितं जगत् चतुर्वि
धं वीक्ष्य सहात्मनामुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत् १३

हा

आत्मना सह जरायुजादि चतुर्विधं जगदंतर्बहिश्च उपतापितं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः समत्रसत्
भयं प्राप के नोपतापितं अद्भिः कथंभूताभिः अतिद्युभिः अतिकां ... ताद्योताभिः खरैश्च सूर्यरश्मिभिः वा
युभिर्वेति शेषः शतह्रदाभिश्च विद्युद्भिः शतह्रदाभीरिति चरीर्घत्वमार्षं छंदानुसारेण १३५

३२

प्रभंजनेनवायुनाघूर्णितंप्रकंपितंवाः उदकंयस्मिन्सः अभ्यधात् छादयामास समंसह १४ सक्ष्मांतरिक्षं भू
म्यंतरिक्षं प्राणिसहितं सदिवं स्वर्गस्यदेवसहितं भगणाः ज्योतिर्गणाः तैः सहितं जटाभिः विक्षिप्य विकीर्य १५

तस्यैवमुद्वीक्षतऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः आपूर्यमाणोवर्षद्भिरंबुदैः क्ष्मामप्यधाद्द्वीपव
र्षाद्रिभिः समं १४ सक्ष्मांतरिक्षंसदिवंसभागणंत्रैलोक्यमासीत्सहदिग्भिराप्लुतं सएकएवोर्वरितोमहामु
निर्बभ्रामविक्षिप्यजटाजडांधवत् १५ क्षुत्तृट्परीतोमकरैस्तिमिंगिलैरुपद्रुतोवीचिनभस्वताहतः तम
स्यपारेपतितोभ्रमद्दिशोनवेदखंगांचपरिश्रमेषितः १६ क्वचिन्मग्नोमहावर्तेस्तरलैस्ताडितः क्वचित्
यादोभिर्भक्ष्यतेक्वापिस्वयमन्योन्यघातिभिः १७ क्वचिच्छोकंक्वचिन्मोहंक्वचिद्दुःखंभयंक्वचित् क्वचि
न्मृत्युमवाप्नोतिव्याध्यादिभिरुतार्दितः १८ अयुतायुतवर्षाणांसहस्राणिशतानिच व्यतीयुर्भ्रमत
स्तस्मिन्विष्णुमायावृतात्मनः १९ सदाचिद्भ्रमंस्तस्मिन्पृथिव्याःककुदिद्विजः न्यग्रोधपोतंददृशेफलप
ल्लवशोभितं २० व

क

स्थो ४
सुखं ४

परिश्रमेणईषितः गतः व्याप्तः इत्यर्थः इषुसर्पणे ईस्मात् १६ अन्योन्यघातिभिः तद्भक्षणार्थंपरस्परंयु
ध्यद्भिः १८ विष्णुमायावृतात्मानइति सतथाद्भूतबानित्यर्थः १९ ककुत्पृथिव्याः ककुदिउन्नतप्रदेशे न्यग्रो
धपोतंकोमलंवटं २०

तस्य दृशानदिक् शाखायां निशि शुमपि २१ श्रीमद्रम्यं वदनं पंकजं यस्य तं कंबुवत् त्रिरेखा वृत्ता ग्रीवा यस्य तं म
होरस्कं विशालवक्षसं सुनासं शोभमाना सा यस्य तं सुंदरे भ्रुवौ यस्य तं २२ श्वासैरेजंतः कंपमानाः अलकास्तै
र्भालं शोभितं कंबुवत् अंतर्वलयेन श्रीर्ययोः तौ कंबुमि श्रयौ तयोः कर्णयोः दाडिमपुष्पं यस्य तं विद्रुमतुल्या
धरभासा ईषत् शोणायितं सुधातुल्यं स्मितं यस्य तं २४ पद्मगर्भवत् आ आ ईषत् अरुणावपांगौ नेत्रांतौ य

प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुं शयानं पर्णपुटके ग्रसंतं प्रभया तमः २१ महामरकतश्यामं श्रीम
द्वदनपंकजं कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवं २२ श्वासैजदलकाभालं कंबुश्रीकर्णदाडिमं विद्रुमाधरभा
सेषच्छोणायितसुधास्मितं २३ पद्मगर्भारुणापांगं हृद्यहासावलोकनं श्वासैजद्वलिसंविग्ननिम्नना
भिदलोदरं २४ चार्वंगुलीभ्यां पाणिभ्यां उन्नीय चरणांबुजं मुखे निधाय विप्रेंद्रो धयंतं वीक्ष्य विस्मितः २५
तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः प्रहृष्टरोमाद्भुतभावशंकितः प्रष्टुं पुरस्तं प्रससार बालकं २६

स्य तं हृद्यो हासो यस्मिन् तदवलोकनं यस्य तं श्वासैरेजंतः चलंतो वलयस्तिर्यक् निम्नरेखाः ताभिः संविग्नाः
चंचलानि निम्ना गंभीरा नाभिर्यस्मिन् तत् दलवत् अश्वत्थपत्रसंकाशं उदरं यस्य तं २४ चारवः अंगुलयो ययोस्ता
भ्यां उन्नीय आकृष्य धयंतं पिबंतं २५ हृत्पद्मं च विलोचनांबुजे च प्रोत्फुल्लानि तानि यस्य सः अद्भुतभावं अप्राकृ
यरूपं तेन शंकितः सन् तं बालं प्रष्टुं पुरः प्रससार समीपं गतः २६

(शा
भ्यां
दा

३२

३२

अहः इदं जगत् यथापुरः प्रलयात्पूर्वं न्यस्तं दृष्ट्वा च अतीव विस्मितः सन् अमुह्यत २७ कृत्स्नशो दर्शनं प्रपंचयति खमित्यादिना ककुभो दिशः पुराणि आकरांश्च खेटान् कर्षकग्रामान् व्रजान् गोकुलानि आश्रमान् वर्णांश्च तेषां वृत्तीश्च सर्वः नानायुगानि कल्पांश्च कल्पयति तैर्वा कल्प्यत इति तथा तं कालं च सदिव परमार्थ इवेत्यवभासितं तेनैव २९

तावच्छिशोर्वै श्वसितेन भार्गवसोंतः शरीरं मशको यथाविशत् तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो यथापुरामुह्यदतीव विस्मितः २७ खं रोदसी भगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभः सुरासुरान् वनानि देशान्सरितः पुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः २८ महांति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल्पकल्प्यं यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितं २९ हिमालयं पुष्पवहां च तां नदीं निजाश्रमं यत्र ऋषीनपश्यत् विश्वं विपश्यं श्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ३० तस्मिन्पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपांगनिरीक्षणेन ३१ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ३२

वटं च वीक्ष्य तस्य प्रेम्णा सुधातुल्यस्मितयुक्तेनापांगनिरीक्षणेन निरीक्षितः सन् ३१ अथ तं बालकं अधोक्षजं परिष्वक्तुमभ्ययादिति द्वयोरन्वयः कथंभूतं नेत्राभ्यां हृदि धिष्ठितं ३२

ताम्रशिखंगलाभा पूर्वमेव भ्रदषेस्तस्यांतर्हितो बभूव तदुद्यमवैफल्ये दृष्टांतः अनीशेन निर्दैवः तेन निर्मिता इहा
क्रीडा यथेति ३३ तं अंतर्हितं भगवंतमनुवटः सलिलं लोकसंप्लवश्चेति रोधापि अंतर्हितः स च स्वाश्रम एव यथा
पूर्वं स्थित इति ३४ द्वादशे नवमः ९ दशमे शिव आगत्य मुनेः तुष्टो वरानदात् तेन साकमतिप्रीत्या समाभा
ष्य सभाजयन् १ ज्ञानवत्त्वप्रकाशमानया स्वभजनं विनाविद्वांसोपि यस्य तव मायया ज्ञानिनो वयमित्यहंकार

तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता ३३ तमन्वथ व
टो ब्रह्मन्सलिलं लोकसंप्लवः तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ३४ इति श्रीभागवते महापुराणे द्वादश
स्कंधे भगवन्मायादर्शनं नवमोध्यायः ९ सूत उवाच स एवमनुभूयेदं नारायणविनिर्मितं वैभवं योगमायाया
स्तमेव शरणं ययौ १ मार्कंडेय उवाच प्रपन्नोस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे यन्मायया पि विबुधाः मुह्यंति ज्ञा
नकाशया २ सूत उवाच तमेवं निभृतात्मानं वृषेण दिविपर्यटन् रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ३
अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाशयं ४ निभृतोदझषव्रातो वाता
पाये यथार्णवः कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ५

णमुह्यंतीत्यर्थः २ श्रीनारायण एव स्वमायादर्शनश्रांतं शिवरूपेण सांत्वयामास तदाह तमेवमित्यादिना निभृता
त्मानं समाहितचित्तं रुद्राण्या भवान्या ३ निभृतानि निश्चलानि आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य तं ४ निभृतं नि
श्चलं उदकं झषव्रातश्च यस्मिन्सः संसिद्धिं फलं साक्षात्कुरु प्रगटीकुरु यतो भवान्सिद्धिदः ५ श्रीशिवलीलकंठ

आशिषः अस्मद्दयलक्षणाः उतस्वित अन्यहेतुः भक्तिमिति ६ संवदिष्यामः संवादं करिष्यामः ७ सात्वतांगतिः ग
ति स्वहेतुः ईशान इति ८ रुद्धधियोंतः करणस्यवृत्तयो येन सः ९ १० नकेवलं बहिरेव आत्मन्यपि प्राप्तं शिवं विचक्ष्य

श्रीभगवानुवाच नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ६ अ
थापि संवदिष्यामो भवान्येतेन साधुना अयं हि परमो लाभो नृणां साधुसमागमः ७ सूत उवाच इत्युक्त्वा तमु
पेयाय भगवान्सात्वतांगतिः ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनां ८ तयोरागमनं साक्षादीशयोर्जगदात्म
नोः नवेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ९ भगवांस्तदभिज्ञाय गिरिशो योगमायया आविशत्तद्गुहाका
शं वायुः छिद्रमिवेश्वरः १० आत्मन्यपि शिवं प्राप्तं तडित्पिंगजटाधरं त्र्यक्षं दशभुजं प्रांशुमुद्यंतमिव भा
स्करं ११ व्याघ्रचर्मांबरं शूलं धनुरिष्वसिचर्मभिः अक्षमालाडमरुककपालपरशुं सह बिभ्राणं सहसा
भातं विचक्ष्य हृदि विस्मितः १२

विस्मितः कथं प्राप्तं सहसा अकस्मादेव हृदि भातं कथंभूतं तडित्पिंगाः जटा धारयतीति तथा तं त्रीण्यक्षी
णि यस्य तं ११ शूलादिभिः साक्षमालादीन् बिभ्राणमित्यन्वयः अक्षमालादीनां द्वंद्वैक्यं १२

विस्मयपूर्वकं बहिर्दर्शनमाह किमिदमिति सोमया उमया सहागतं रुद्रं ददृशे १४ ततो ननाम १४ पूर्णकामस्य वै व्य
ग नक्ति येन त्वया लोकं निर्वृतं भवतीति १५ निर्गुणत्वेन त्रिगुणत्वेन च नमस्करोति नमः शिवाय निर्गुणाय सत्त्वाय
सात्त्वाधिष्ठात्रे अत एव प्रमृडयतीति सुखयतीति तथा तस्मै १६ नो अस्मान् नः त्रयः ब्रह्मविष्णुमहेश्वराः यस्य

णं

35

किमिदं कुत एवेति समाधेर्विरतो मुनिः नेत्रे उन्मील्य ददृशे सगणं सोमयागतं १३ रुद्रं त्रिलोकैकगुरुं ननाम शिर
सा मुनिः तस्मै सपर्यां व्यदधात्सगणाय सहोमया स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः १४ आह त्वात्मानु
भावेन पूर्णकामस्य ते विभो करवाम किमीशान येनेदं निर्वृतं जगत् १५ नमः शिवाय शांताय सत्त्वाय प्रमृडाय
च रजोजुषेऽथ घोराय नमस्तुभ्यं तमोजुषे १६ श्रीसूत उवाच एवं स्तुतः स भगवानादिदेवः सतां गतिः परि
तुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत १७ श्रीभगवानुवाच वरं वृणीष्व नः कामं वरदेशा वयं त्रयः अमोघं दर्श
नं येषां मर्त्यो यद्विंदतेऽमृतं १८ ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः एकांतभक्ता अस्मासु निर्वैराः
समदर्शिनः १९ सलोका लोकपालास्तान्वंदंत्यर्चंत्युपासते अहं च भगवान्ब्रह्मा स्वयं च हरिरीश्वरः २०

येभ्यः ते वयं १८ वरदानादिना भवत्सेवैवास्माभिः क्रियते न तु अनुग्रहः जगद्वंद्यत्वात् कुरुतामिति ब्राह्मणान्स्तौ 35
ति ब्राह्मणा इत्यादिना ये साधवः सदाचाराः शांताः मत्सरादिरहिता निःसंगाः निष्कामाः १९ न केवलं त एव
किं च अहं चेत्यादिना २०

पद्यतमस्वेहेत्वंतरमाह नेति अण्वपि अणुमात्रमपि चक्षते पश्यंति तत्तस्मात् एवंभूतान्युष्मान् ईमहि भजे
म २१ ब्राह्मणेभ्यः ब्राह्मणान् आत्मसमाधानं चित्तैकाग्र्यं तप आलोचनं स्वाध्यायोऽध्ययनं संयमः वागादिनि
यमनैः २२ किंच श्रवणादित्यादि २३ चंद्रललामो भूषणं यस्य तस्य धर्मरहस्यमुक्तं अमृतास्यंदं वचः कर्णा

नतेमप्यऽच्युतेमेच भिदामण्वपिचक्षते नात्मनश्च जनस्यापितत्कष्मान्वयमीमहि २१ नह्यम्मयानितीर्था
निनदेवाश्चेतनोज्झिताः तेपुनंत्युरुकालेन यूयंदर्शनमात्रतः २२ ब्राह्मणेभ्योनमस्यामोयेस्मद्रूपंत्रयीमयं
बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः २३ श्रवणाद्दर्शनाद्वापिमहापातकिनोपिवः शुद्ध्येरन्नंत्यजाश्चा
पिकिमुसंभाषणादिभिः २४ सूतउवाच इतिचंद्रललामस्यधर्मगुह्योपबृंहितं वचोमृतायनमृषिर्नातृप्य
त्कर्णयोपिबन् २५ सचिरंमायया विष्णोर्भ्रामितःकर्षितोभृशं शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत् २६
ऋषिरुवाच अहोईश्वरवर्यैयंदुर्विभाव्यानुशरीरिणां यन्नमंतीशितव्यानिस्तुवंतिजगदीश्वराः २७ धर्मंग्रा
हयितुंप्रायःप्रवक्तारश्चदेहिनां आचरंत्यनुमोदंतेक्रियमाणंस्तुवंतिच २८

भ्यां पिबन्नातृप्यन् अलमिति नामन्यत कर्णयोरमृतायनं वा इति वान्वयः २४ शिवस्य वागेवामृतं येन ध
स्तः क्लेशपुंजो यस्य सः २५ इयं लीला दुर्विभाव्य अवितर्क्या यया ईशितव्यानि प्रम्यानि भूतानि जगदी
श्वराः स्वयं नमंति स्तुवंति २७ अथ वा लोकसंग्रहमात्रमेतदित्याह धर्ममिति प्रवक्तारोपि यस्त्वयं देहिनाम् २८

धर्ममाचरंति

लिले

नन्वेतस्य भावतिरस्कारकं कथं मया क्रियते तत्राह नेति एतावता लोकसंग्रहमात्रेण तैर्नमनादिभिः कथंभूतैः स्वमायामयीवृत्तिर्येषु तैः भगवतो मायिनस्तथानुभावन दुःष्येत यतः प्रसिद्धस्य मायिनः कुहकस्य कपटं यथा तथैतानि नमनादीनि अतस्तस्य यथा कुहकेनास्मानुभावो न दुःष्येत इति पाठे नकारस्य दृष्टांतेनुषंगः ३० मायाचेष्टितं प्रपंच यति दृष्टांतिस्वप्नदृक् यथा स्य विद्याचेष्टितं दृष्टांतः ३१ त्रिगुणत्वेपि न जीववदभिभूताय किंतु गुणानामात्मने नियंत्रे ३२

३६

नैतावता भगवतः स्वमायामयवृत्तिभिः न दुःष्येतानुभावस्तैर्मायिनः कुहकं यथा ३० सृष्ट्वेदं मनसा विश्वमात्मनाऽनुप्रविश्य यः गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा ३१ तस्मै नमो भगवते त्रिगुणाय गुणात्मने केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये ३२ कं वृणे नु परं भूमन्वरं त्वद्वरदर्शनात् यद्दर्शनात्पूर्णकामः सत्यकामः पुमान्भवेत् ३३ वरमेकं वृणेथापि पूर्णात्कामाभिवर्षणात् भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ३४ सूत उवाच इत्यर्चितोभिष्टुतश्च मुनिना सूक्तया गिरा तमाह भगवाञ्छर्वः शर्वया चाभिनंदितः ३५ कामस्तेयं महर्षे स्त भक्तिमांस्त्वमधोक्षजे आकल्पांताद्यशः पुण्यमजरामरता तथा ३६

वरं वृणीष्वेति यदुक्तं तत्राह कमिति वरं त्वद्दर्शनं यस्य तस्मात्त्वतः परं कं नु कं वरं वृणे यस्य त्वद्दर्शनात्पूर्णकामः सर्वानंदसंदोहरूपः सत्यकामः यथेच्छं प्राप्तसर्वानंदः ३३ वरदानाय स्वयमेव प्रवृत्तः शर्वया उमया चाभिनंदितः। अनुमोदितः सन्नाह ३५ कामोयं सर्वोपि अन्यच्च पुण्यं यशः इत्यादि ब्रह्मवर्चस्विनस्ते भूयादित्युत्तरेणान्वयः यस्त्वमधोक्षजे भक्तिमान् ३६

३६

तस्यकर्मतपः आदिमुनेः पुरानुभूतं भगवन्मायावैभवं तच्चकथयन् ३८ अवाप्तोमहायोगमहिमायेनसः ३९
एतन्मार्कंडेयस्यचरितं तेनानुभूतंच भगवन्मायावैभवं तेनुवर्णितं ४० ननु एवमेष्वस्मत्कुलोत्पन्नस्य सप्तकल्पा
ष युष्ट्वं श्रूयमानं विरुद्धं भवतीत्याह एतन्मार्कंडेयेनानुभूतं भगवन्मायावैभवं नानाकल्परूपं कादाचित्कं ईश्वरेच्छ
यातस्यैवाकस्मिकं नतुसर्वसाधारणं एतत्केचित् अनादिबहुकालं आवर्तितं देवयुगसहस्रद्वयमानेनपुनः

ज्ञानंत्रैकालिकंब्रह्मन्विज्ञानं [illegible]च विरक्तिमत् ब्रह्मवर्चस्विनोभूयात् पुराणाचार्यतास्तुते ३७ सूतउवाच
एवंवरान्समुनयेदत्त्वागात्त्र्यक्षईश्वरः देव्यैतत्कर्मकथयन्ननुभूतंपुरामुना ३८ सोप्यवाप्तमहायोगमहिमाभा
र्गवोत्तमः विचरत्यधुनाप्यद्धाहरावेकांततांगतः ३९ अनुवर्णितमेतत्तेमार्कंडेयस्यधीमतः अनुभूतंभग
वतोमायावैभवमद्भुतं ४० एतत्केचिदविद्वांसोमायासंसृतिमात्मनः अनाद्यावर्तितंनृणांकादाचित्कंप्रच
क्षते ४१ यएवमेतद्भृगुवर्यवर्णितं रथांगपाणेरनुभावभावितं संश्रावयेत्संशृणुयादुतावुभौतयोर्नकर्मा
शयसंसृतिर्भवेत् ४२ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेशिवर्षिसंवादेमायादर्शनंनामदशमोध्यायः १०

पुनःपरिवर्तितंप्रचक्षते केचिन्नृणांसंसृतिंसर्गप्रलयादिलक्षणां आत्मनोभगवतोमायेवैवमविद्वांसस्स्वमायाशि
शोः श्वासोच्छ्वासाभ्यां सहकृत्वा तदुदरप्रवेशनिर्गमतः स एकस्य तत्क्षणमात्रेणेतिवदंति अतोनविरोधइत्यर्थः
४१ संशृणुयात्संश्रावयेद्वायो तावुभौ तयोःकर्मवासनाकृतासंसृतिर्नभवेदिति २ इतिद्वादशेदशमोध्यायः १०

एकादशेतुपूर्वार्धेमहापुरुषवर्णनं स्वैर्व्यूहैस्य व्याख्यानंप्रतिमासंपृथक्पृथक् १ येनामर्त्यत्वमाप्नोतिमर्त्योसौ
भार्गवोत्तमः तंपृष्टितिक्रियायोगं सांगोपांगादिकल्पितं २ अथेतिहेभागवत यतोभगवान् समस्ततंत्रसिद्धांते त
त्ववित्प्रष्टव्यमाह तांत्रिकाइति परिचर्यायां उपासनायां विषयेकेवलस्य चैतन्यघनस्य अंगानिपादादीनि हृदी उपांगानि
गरुडादीनि आयुधानिसुदर्शनादीनि आकल्पाकौस्तुभादयः तेषांद्वंद्वैक्यं तद्यथाकल्पयंति यैश्चतत्त्वैःकल्पयंति ३ तन्नो वर्णयेति
३७ गुरुपरंपरागम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह नमस्कृत्येति विभूतीः विराड्विग्रहाद्याः ४ अंगादिकल्पनां

शौनकउवाच अथेममर्थंपृच्छामोभवंतंबहुवित्तमं समस्ततंत्रराद्धांतेभवान्भागवततत्त्ववित् १ तांत्रिकाःपरिचर्या
ल यांकेवलस्यश्रियःपतेः अंगोपांगायुधाकल्पंकल्पयंतियथैवयैः २ तन्नोवर्णयभद्रंतेक्रियायोगंबुभुत्सतां येनक्रिया
नैपुण्येनमर्त्योयायादमर्त्यतां ३ सूतउवाच नमस्कृत्यगुरून्वक्ष्येविभूतीर्वैष्णवीरपि याःप्रोक्तावेदतंत्राभ्यामाचा
र्यैःपद्मजादिभिः ४ मायाद्यैर्नवभिस्तत्त्वैःसविकारमयोविराट् निर्मितोदृश्यतेयत्रसचित्केभुवनत्रयं ५

भूरादिभिर्दर्शयितुं प्रथमंतावद्यथाकल्पयंतीतिप्रश्नस्यवैराजरूपेणोत्तरंवक्तुंविराड्विग्रहमाह मायाद्यैःप्रकृति
सूत्रमहदहंकारपंचतन्मात्रैः नवभिस्तत्त्वैः विकारएकादशेंद्रियाणि पंचमहाभूतानीतिषोडशात्मकोविराट् सः
प्रसिद्धोनिर्मितोयत्रविराजिसचित्केचेतनाधिष्ठितंभुवनत्रयंदृश्यते अनेनांगादिकल्पनासोलभ्यंदर्शितं ॥५॥ ३७

एतद्वै पौरुषं रूपं पुरुषस्य वैराजस्वरूपमेवेश्वरेणाधिष्ठितत्वात् विवक्षया तत्स्वरूपमुच्यते अंगकल्पनामाह भूः पादा
विसादि त्रिभिः भूराद्यनुवादेन भगवत्पादादि विभावना विधीयते ६ प्रजननं मेढ्रं अपानः पायुः ८ अनुक्रमान्यद
प्येवमहत्वं इत्याह यावानयं व्यष्टिपुरुषः स्वमानतः सप्तवितस्ति संख्यायावयवसंनिवेशेन मितः ९ भूषणादीन्याह

एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ६ प्रजापतिः प्रजन
नमपानो मृत्युरीशितुः तद्बाहवो लोकपालाः मनश्चंद्रो भ्रुवौ यमः ७ लज्जोत्तरोऽधरो लोभो दंतज्योत्स्ना स्मयो भ्रमः
रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः ८ यावानयं वै पुरुषो यावत्या संस्थया मितः तावानसावपि महा त्या
पुरुषो लोकसंस्थया ८ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः तत्प्रभा व्यापिनी साक्षाच्छ्रीवत्समुरसा वि ६
भुः १० स्वमायां वनमालाख्यां नानागुणमयीं दधत् वासः छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं ११ बिभर्ति सां
ख्यं योगं च देवो मकरकुंडले मौलिं पदं पारमेष्ठ्यं सर्वलोकभयं[illegible]करं १२ अव्याकृतमनंताख्यमासनं यदधि
ष्ठितः धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते १३ तं

कौस्तुभेत्यादिना स्वात्मज्योतिः शुद्धजीवचैतन्यं यात तस्य कौस्तुभस्य प्रभा तामेव श्रीवत्सं बिभर्ति १० त्रिवृत्स्व
रं त्रिमात्रं प्रणवं पारमेष्ठ्यं पदं ब्रह्मलोकं १२ अव्याकृतं प्रधानं यत् अधिष्ठितः अधिष्ठाय स्थितः तदासनभूतं

तथा

मुख्यतत्त्वं प्राणतत्त्वं प्राणो वै मुख्य इति श्रुतेः दरवरं शंखं १४ आकूतीः क्रियाशक्तियुक्तं मनः अस्य रथस्याभिव्यक्तिः बहिरपि व्यक्तरूपं मुद्रयाधृतया अर्थक्रियात्मतां वरदाभयादि रूपत्वं बिभर्ति तत्तन्मुद्रयां भावयेदित्यर्थः १६ मंडलं देवयजनं देवपूजा भूमिं सूर्यमंडलत्वेन भावयेदित्यर्थः अंतर्वह्निमंडलं वा दीक्षासंस्कारः आत्मनः गुरुकृतां मंत्रदीक्षामेव आत्मनस्स्वपूजायोग्यतां भावयेदित्यर्थः परिचर्येति भगवतस्तां परिचर्यां स्वस्य सकलपापक्षयाय एवंरूपां भावयेदित्यर्थः १७ सर्वमासनपद्म

३८

ओजः सहोबलयुतं मुख्यतत्त्वं गदां दधत् अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनं १४ नभोनिभं नभस्तत्त्वमसिं चर्म तमोमयं कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं १५ इंद्रियाणि शरानाहुराकूतीरस्य स्यंदनं तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां १६ मंडलं देवयजनं दीक्षासंस्कार आत्मनः परिचर्या भगवत आत्मनो दुरितक्षयः १७ भगवान्भगशब्दार्थं लीलाकमलमुद्वहन् धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् १८ आतपत्रं तु वैकुंठं द्विजा धामाकुतोभयं त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं १९

व

मुक्तं इदानीं हस्तस्थं पद्ममाह भगवानिति भगवच्छब्दार्थं ऐश्वर्यादि षाड्गुण्यं १८ हे द्विजाः एकवचनांतो वा पाठः अकुतोभयं कैवल्यं धामगृहं समभजत् यद्वा वैकुंठस्य विशेषणं अकुतोभयं यद्धामेति त्रिवृत् ऋग्यजुः सामरूपो वेदः सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिर इत्यादि मंत्रलिंगात् यज्ञरूपं पुरुषं यज्ञो वै विष्णुरिति श्रुतेः १९ श्रीरामतु

३८

अनपायिनी हरेः शक्तिः तत्र हेतुः साक्षादात्मनः स्वस्वरूपस्य चिद्रूपत्वात् तस्यास्तदभेदादित्यर्थः तंत्रमूर्तिं पंचरात्राद्यागमरू
पः येऽणिमादयोऽशेषगुणास्ते हरेर्द्वारपालानंदादयः २० तस्यैव चतुर्व्यूहोपासनामाह वासुदेवादिशब्दैः पुरुषः श्रीना
रायण एव स्वयं मूर्तिभेदैरुपास्य इत्यभिधीयते २१ तस्यैवाध्यात्मनि चतुर्धोपासनमाह सएवभगवान्विश्वादिशब्दैरिति व्युतो
भिः आग्रदाद्यवस्थाभिः परिभाव्यते तद्रूपाण्याह अर्थाः बाह्याः इंद्रियं मनः आत्मा स्तदुभयसंस्कारयुक्तमज्ञानं ज्ञा

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः विश्वक्सेनस्तंत्रमूर्तिर्विदितः पार्षदादिभिः २० नंदादयो येऽष्टौ द्वास्थाश्च
तेऽणिमाद्या हरेर्गुणाः वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं अनिरुद्ध इति ब्रह्मन्मूर्तिर्व्यूहोऽभिधीयते २१ स विश्व
स्तैजसः प्राज्ञस्तुरीय इति रत्तिभिः अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते २२ अंगोपांगायुधाकल्पैर्भगवांस्तच्च
तुष्टयं बिभर्ति स्म चतुर्मूर्तिर्भगवान्हरिरीश्वरः २३

नं त्रितयसाक्षीति २२ उक्तं चतुर्व्यूहद्वयोपासनेऽपि पर्वोक्तमंगाद्युपासनमाह अंगेति अंगादिभिरुपलक्षितो
भगवान्हरिर्वासुदेवादिचतुर्मूर्तिः सन्नूविश्वादिचतुष्टयं बिभर्ति स्म विश्वादिभावेऽपि तन्नियंतुस्तस्य न जीवत्व
मित्यादि विश्वादिचतुष्टयं बिभ्रदपि भगवानीश्वर एवेति २३

तस्यब्रह्मात्रिदिमर्त्तितामाह द्विजऋषभेति सएषएव भगवान्ब्रह्मयोनिर्वेदस्य कारणमित्यादिहेतुत्रयं वस्तुतोभेदाभा
८ वेपिस्वगतमायया सृजति हरति पातीति कृष्णआख्यया ब्रह्मादिरूपया अनावृताक्षः अंतःछन्नज्ञानोपिविवृत
इवभिन्नइवनिरुक्तः शास्त्रेषुनतुभिन्नः अत्रविद्वदनुभवंप्रमाणयति यतस्तत्परैरात्मत्वेनैवलभ्यतइति २४ यस्येद

३७

द्विजऋषभसएषब्रह्मयोनिः स्वयंदृक्स्वमहिमपरिपूर्णोमाययाचस्वयैतत् सृजतिहरतिपातीत्याख्ययानावृता
क्षोविविक्तइवनिरुक्तस्तत्परैरात्मलभ्यः २४ श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंन
दगोपवनिताव्रजभृत्यगीततीर्थश्रवःश्रवणमंगलपाहिभृत्यान् २५ यइदंकल्यउत्थायमहापुरुषलक्षणं तच्चि
त्तः प्रयतोजप्त्वाब्रह्मवेदगुहाशयं २६

मुपासनमुक्तं तंश्रीकृष्णं प्रार्थयते कृष्णसखअर्जुनसखवृष्णिश्रेष्ठ अवनिद्रुहोयेराजन्यास्तेषांवंशस्यदहनअ
नपवर्गं अक्षीणंवीर्यं यस्यगोपवनितानांव्रजाः समूहाः भृत्यानारदादयः तैर्गीतंतीर्थभूतंश्रवः कीर्तिर्यस्य
श्रवणमेव मंगलयस्य २५ एतज्जपमात्रस्यापि ब्रह्मज्ञानफलमित्याह यइति कल्येउषःकालेयस्तच्चित्तः प्र ३७
यतः शुचिस्तंस्वस्थंगुहाशयंहृदिस्थंब्रह्मपश्यति २६

मंडलंदेवयजनमित्युक्त्वाबुद्धिमागतः मूर्त्तिव्यूहप्रसंगेन रविव्यूहोऽत्रपृछ्यते १ शुकइतिपंचमेयदाह तथान्येचऋषयो
गंधर्वाअप्सरसोनागाग्रामण्योयातुधानादेवाइत्येकैकशोगणाः सप्तेत्यादिना सौरः सूर्यसंबंधीसप्तानांगणाः २ ते
षांसप्तानामधीश्वरैः तत्तन्मूर्तिभिः तत्तन्मासाधिकृतसूर्यैर्वा व्यूहंविभागं २८ तत्रतावद्व्यूहंनिरूपयितुं प्रथमंसूर्य
स्वरूपमाह अनाद्यविद्ययामायया अयंसूर्यः लोकतंत्रः लोकयात्राप्रवर्त्तकः २९ अतस्तस्यक्रियाभेदोपाधिकमेव
नानात्वं नतुस्वतइत्याह एकएवेति सूर्यआत्माजगतस्तस्थुषश्चेतिश्रुतेः जगदात्माआदिकृत्सृष्टिकर्त्ताहरिरेव

शौनकउवाच शुकोयदाहभगवान्विष्णुरातायशृण्वते सौरोगणोमासिनानावसतिसप्तकः २८ तेषांनामानि मासि
कर्माणिसंयुक्तानामधीश्वरैः ब्रूहिनःश्रद्दधानानांव्यूहंसूर्यात्मनोहरेः २९ सूतउवाच अनाद्यविद्ययाविष्णो
रात्मनःसर्वदेहिनां निर्मितोलोकतंत्रोयंलोकेषुपरिवर्त्तते ३० एकएवहिलोकानांसूर्यआत्मादिकृद्धरिः सर्ववे
दक्रियामूलमृषिभिर्बहुधोदितः ३१ कालोदेशःक्रियाकर्त्ताकरणंकार्यमागमः द्रव्यंफलमितिब्रह्मन्नवधोक्तोजयाहरिः ३२

सूर्यः सचसर्वासांवेदोक्तक्रियाणांमूलंसन् तेनोपाधिनाबहुधोक्तः ३० कालरूपधारिणोदेहादेर्हृदयादिस्वरू
पभेदं क्रियोपाधिकंदर्शयितुं प्रथमंसर्वकर्मप्रवृत्तये मायाकृतंनवधाभेदमाह कालइति कालःप्रातरादिः
देशःगंगादिः क्रियाअनुष्ठानं कर्त्ताब्राह्मणादिः कारणंस्रुगादि कार्यं यागादि आगमः मंत्रादि द्रव्यंव्रीह्या
दिफलंस्वर्गादि ३१

पुंजकस्थलीअप्सरा

तत्र च कालरूपधारी भगवान्पृथक् चरति मध्वादिषु चैत्रादिषु लोकतंत्राय लोकयात्रानिर्वाहाय ३२ नवनेगणाना
ह द्वादशेति द्वादशभिः धातासूर्यः कृतस्थलीअप्सराः हेतिः राक्षसः वासुकिः नागः रथकृद्यक्षः पुलस्त्यऋषिः
तुंबरुगंधर्वः ३३ अथो अर्यमा पुलहोऽथौजाः प्रहेतिः पुंजिकस्थली नारदः कच्छनीरो नागः माधवं ३४ मित्रः सूर्यः अत्रिः ऋषिः
हाहा गंध पौरुषेयो राक्षसः रथस्वनो यक्षः शुक्रमासं ज्येष्ठं नयंत्यनुवर्तयंति ३५ वरुणः सूर्यः सहजन्याप्सराः शुक्रो नागः
४० र्वः [illegible]नागः

मध्वादिषु द्वादशसु भगवान् कालरूपधृक् लोकतंत्राय लोकयात्रानि चरति पृथक् द्वादशभिर्गणैः ३२ धाता
कृतस्थली हेतिः वासुकी रथकृन्मुने पुलस्त्यस्तुंबरुरिति मधुमासं नयंत्यमी ३३ अर्यमा पुलहोऽथौजाः प्रहेतिः पुं
जिकस्थली नारदः कच्छनीरश्च नयंते ते स्म माधवं ३४ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहा रथस्वन
इति ह्येते शुक्रमासं नयंत्यमी ३५ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः शुक्रश्चित्रस्वनश्चैव शुचिमासं
नयंत्यमी ३६ इंद्रो विश्वावसुः श्रोता एलापत्रस्तथांगिराः प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी ३७
विवस्वाननुग्रसेनश्च व्याघ्र आसारणो भृगुः अनुम्लोचा शंखपालो नभोमासं नयंत्यमी ३८

चित्रस्वनो राक्षसः शुचिमासं आषाढं ३६ इंद्रः सूर्यः विश्ववसुः गंधर्वः श्रोतयक्षः एलापत्रो नागः
वर्यो राक्षस इति स्वयमेव व्याख्यातं नभोमासं श्रावणं ३७ विवस्वत्सूर्यः उग्रसेनो गंधर्वः व्याघ्रो राक्षसः ४०
आसरणो यक्षः शंखपालो नागः नभस्याख्यं भाद्रपदं ३८

ध्यय घृताचीसरा

पूषा सूर्यः धनंजयो नागः वातो राक्षसः सुषेणो गंधर्वः सुरुचिर्यक्षः तपोमासं माघमासं क्रमादिलंघनं कौर्मेवाद्यादि क्रमानु
मा सारेण वेद्यवेतु सत्क्रमेणैवोक्तिः क्वचिन्नामव्यत्ययस्तु कल्पभेदेनाविज्ञेयं ३९ ऋतुर्यक्षः वर्चा राक्षसः पर्ज
न्यः सूर्यः सेनजित् अप्सराः विश्वो गंधर्वः ऐरावतो नागः तपस्याख्यं फाल्गुनं ४० अंशुः सूर्यः अंशु इति वा
पाठः तार्क्ष्यो यक्षः ऋतसेनो गंधर्वः विद्युच्छत्रुः राक्षसः अरिष्टनेमि नागः उर्णा यक्षः आयुर्ऋषिः कर्कोटको

पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा घृताची गौतमश्चेति तपोमासं नयंत्यमी ३९ ऋतुर्वर्चा भरद्वा
जः पर्जन्यः सेनजित्तथा विश्व ऐरावतश्चैव तपस्याख्यं नयंत्यमी ४० अथांशुः कश्यपस्तार्क्ष्य ऋतसेन
स्तथोर्वशी विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी ४१ भगः स्फूर्जोऽरिष्टनेमिरूर्णआयुश्च पंचमः कर्को पू
टकः पूर्वचित्तिः पुष्यमासं नयंत्यमी ४२ त्वष्टा ऋचीकतनयः कंबलाश्वस्तिलोत्तमा ब्रह्मापेतोऽथ शतजित्
धृतराष्ट्र इषंभरः ४३ विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित् विश्वामित्रो मखापेत ऊर्जमासं नयंत्यमी ४४

नागः ४२ ऋचीकतनयो जमदग्निः कंबलाश्वो नागः ब्रह्मापेतो राक्षसः शतजिद्यक्षः धृतराष्ट्रो गंधर्वः इषं
भराः आश्विनपालकाः ४३ विष्णुरादित्यः अश्वतरो नागः सूर्यवर्चा गंधर्वः सत्यजित् यक्षः मखापेतो राक्षसः
रंभाप्सराः ऊर्जमासं कार्तिकं ४४

४१

एतेचादित्यादयः कोर्म्येविभज्योक्ताः धातार्यमा च मित्रश्च वरुणश्चेंद्र एवच विवस्वानथ पूषाचपर्जन्यश्चांशुरेव
च भगस्त्वष्टाचविष्णुश्च आदित्याद्वादशस्मृताः १ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोथांगिराभृगुः गौतमोथभरद्वा
जः कश्यपः क्रतुरेवच जमदग्निः कौशिकश्चमुनयोब्रह्मवादिनः २ रथकृच्चोऽरिष्टनेमिर्ग्रामणीश्चरथस्वनः
रथचित्रस्वनः श्रोताअरुणः सेनजित्तथा तार्क्ष्यश्चारिष्टनेमिश्च ऋतजित्सत्यजित्तथा ३ एते यक्षाः
अथहेतिः प्रहेतिश्च पौरुषेयोवधस्तथा वर्योव्याघ्रः स्तथापश्च वायुर्विद्युद्दिवाकरः ब्रह्मोपेतश्चविप्रेंद्रा

एताभगवतोविष्णोरादित्यस्यविभूतयः
स्मरतांसंध्ययोर्नॄणां हरंत्यंहोदिनेदिने ४९

यज्ञोपेतश्चरक्षसाः ४ वासुकिः कच्छनीरश्चतक्षकः सर्पपुंगवः एलापत्रः शंखपालस्तथैरावतसंज्ञितः
धनंजयोमहापद्मस्तथाकर्कोटकोद्विजाः कंबलोश्वतरश्चैववहंत्येवंयथाक्रमं ५ तुंबुरुर्नारदोहाहाहूहू
विश्वावसुस्तथा उग्रसेनोवसुरुचिर्विश्वावसुरथापरः चित्रसेनस्तथोर्णायुर्धृतराष्ट्रोद्विजोत्तमाः सूर्य
वर्चाद्वादशैतेतुगंधर्वागायतांवराः ६ कृतस्थल्यप्सरोवर्यातथाऽन्यापुंजिकस्थली मेनकासहजान्या
चप्रम्लोचाचद्विजोत्तमाः अनुम्लोचाघृताचीचविश्वाचीचोर्वशीतथा अन्याचपूर्वचित्तिः स्यादन्या
चैवतिलोत्तमा रंभाचेतिद्विजश्रेष्ठास्तथैवाप्सरसः स्मृताइति ७ ४९

४१

एतेषां पृथक्कर्माणि निरूपयति द्वादशस्वपीति त्रिभिः असौ देवः सूर्यः षड्भिर्गंधर्वादिभिः अस्य जनस्य स
मंताच्चरणं न् शुभां मतिं तनुते गायंत्यर्थेनेन स्तूयते ४६ तल्लिंगैः सूर्यप्रकाशकैः ४७ उन्नह्यंति

स्य
द्वादशस्वपिमासेषुदेवोऽसौषड्भिरस्यवै चरन्समंतात्तनुतेपरत्रेहचसन्मतिं ४६
सामर्ग्यजुर्भिस्तल्लिंगैर्ऋषयः संस्तुवंत्यमुं गंधर्वास्तंप्रगायंतिनृत्यंत्यप्सरसोग्रतः
४७ उन्नह्यंतिरथंनागाग्रामण्योरथयोजकाः नोदयंतिरथंपृष्ठेनैर्ऋताबलशा
लिनः ४८ वालखिल्याःसहस्राणिषष्टिर्ब्रह्मर्षयोमलाः पुरतोभिमुखंयांतिस्तु
वंतिस्तुतिभिर्विभुं ४९ एवंह्यनादिनिधनोभगवान्हरिरीश्वरः कल्पेकल्पेस्वमात्मा
नंव्यूह्यलोकानवत्यजः ५० इतिश्रीभागवतेम० सूर्यव्यूहवर्णनंएकादशोध्यायः ११

रथंबध्नंति ग्रामण्यो यक्षाः नैर्ऋताः राक्षसाः ४८ किंच वालखिल्या इति एतेप्रतिमासं तमेवविभुं
सूर्यम् ४९ व्यूह्यविभज्य ५० इतिद्वादशस्कंधेपंडितकृतटिकायां एकादशोध्यायः ११ ८७

द्वादशेतुपुराणोक्तसर्वार्थानुक्रमः कृतः प्रथमस्कंधमारभ्यप्राधान्येनसमासतः १ तदेवमस्मिन्पुराणोक्तानर्थान् संक्षेपतोवर्णयिष्यन् धर्मादीन्प्रणमति नमइति महतेहरिभक्तिलक्षणाय ब्राह्मणेभ्यः ब्राह्मणान् सनातनान् धर्मान्नित्य पलक्षिणं पुराणोक्तार्थान् १ पुरुषस्वेउचितंश्रवणादियोग्यं २ एतत्प्रपंचयति अत्रेति भगवान्षडैश्वर्यादिषड्गुणःयुक्तः साक्षात्संकीर्तितइतिदेवताकांडार्थाः ३ ब्रह्मकांडार्थमाह अत्रब्रह्मेति गुह्यंनिर्गुणं प्रभवाप्ययं प्रभवस्यस्मा

सूतउवाच नमोधर्मायमहतेनमःकृष्णायवेधसे ब्राह्मणेभ्योनमस्कृत्यधर्मान्वक्ष्येसनातनान् १ एतद्वःकथितंविप्राविष्णोश्चरितमद्भुतं भवद्भिर्यदहंपृष्टोनराणांपुरुषोचितम् २ अत्रसंकीर्तितः साक्षात्सर्वपापहरोहरिः नारायणोहृषीकेशोभगवान्सात्वतांपतिः ३ अत्रब्रह्मपरंगुह्यंजगतः प्रभवाप्ययं ज्ञानंचतदुपाख्यानंप्रोक्तंविज्ञानसंयुतं ४ भक्तियोगःसमाख्यातोवैराग्यंचतदाश्रयं ५

दिति प्रभवं अप्येस्मिन्नित्यप्ययंतच्चतच्च अनेनाश्रय शब्दार्थोदर्शितः विज्ञानसंयुतं अपरोक्षज्ञानपर्यंतंज्ञानम् तदुपाख्यानंतत् ज्ञानमुपाख्यायते प्रकाश्यतेयेनतत् ज्ञानसाधनमित्यर्थः ४ कर्मकांडार्थमाह भक्तियोगश्चसाध्यसाधनरूपः तदाश्रयं भक्तियोगेननिष्पादितं ५ श्रीविंदगोपालमकुंदकृष्ण

एवं सामान्यतो निरूप्येदानीं द्वादशस्कंधप्रकरणार्थान् अनुक्रामति पारीक्षितमुपाख्यानं परिक्षिज्जन्मादि तत्र स्तावायनारदाख्यानं च ५ ब्रह्मर्षेर्ब्राह्मर्षेर्ब्राह्मणोत्तमस्य इति प्रथमस्कंधार्थाः ६ उत्क्रांतिरर्चिरादिगतिः प्राधानिकः प्रधानकार्यवि॰ः अग्रतः आदितः महदादिक्रमेणेत्यर्थः द्वितीयार्थः महापुरुषस्य संस्थितिः प्रलये तद्धी
राट्सर्गः

यो॰

पारिक्षितमुपाख्यानं नारदाख्यानमेव च ५ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः शुकस्य चैव ब्रह्मर्षेः संवादश्च परीक्षितः ६ योगधारणयोत्क्रांतिः संवादो नारदाजयोः अवतारानुगीतं च सर्गः प्राधानिकोग्रतः ७ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ८ ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः ९ कालस्य स्थूलसूक्ष्मस्य गतिः प॰ प्रसमुद्भवः भुवउद्धरणं चाब्धे हिरण्याक्षवधो यतः १० ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च अर्धनारीनरस्याथ यतः स्वायंभुवो मनुः ११ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः १२ अवतारो भगवतः कपिलस्य महात्मनः देवहूत्याश्च संवादः कपिलेन च धीमता १३

॰वधानं ८ प्राकृतिकः प्रकृतेरभवो गुणक्षोभरूपः वैकृतिका महदादयः चकाराद्विकारश्च येतयोस्तेषां च सर्गः गतिः स्वरूपं उद्धरणं उद्धरणे १० अर्द्धाभ्यां नारी नरश्च तस्य ११ संतानो धर्मपत्नीनां क्षितिनवब्रह्मसमुत्पत्ति
पत्यं

चतुर्थस्कंधार्थमाह नवब्रह्मणां मरीच्यादीनां समुत्पत्तिः संतानः १४ पंचमस्कंधार्थमाह ततः प्रैयव्रतं प्रियव्रतस्य
पा चरितं १५ द्वीपवर्णनं प्रथमं संक्षेपतः ततो द्वीपादीनां ये गिरयो नद्यश्च तेषामुपवर्णनं पातालनरकादीनां च संस्थि

नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं ध्रुवस्य चरितं पश्चात् पृथोः प्राचीनबर्हिषः १४ नारदस्य च संवादः ततः प्रैयव्रतं
द्विजाः नाभेस्ततोनुचरितमृषभस्य भरतस्य च १५ ततो द्वीपसमुद्राद्रिवर्षनद्युपवर्णनं ज्योतिश्चक्रस्य संस्थानं पाताल
नरकस्थितिः १६ दक्षजन्म प्रचेतोभ्यः तत्पुत्रीणां च संततिः यतो देवासुरनरास्तिर्यङ्नगखगादयः १७ त्वाष्ट्रस्य ज
न्मनिधनं पुत्रयोश्च दितेर्द्विजाः दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः १८ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं
मन्वंतरावताराश्च विष्णोर्हयशिरादयः १९ कौर्म्यं मात्स्यं नारसिंहं वामनं च जगत्पतेः क्षीरोदमथनं तद्वदमृतार्थे दि
वौकसां २० देवासुरमहायुद्धं राजवंशानुकीर्तनं इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः २१ इलोपाख्या
नमत्रोक्तं तारोपाख्यानमेव च सूर्यवंशानुकथनं शशादाद्या नृगादयः २२ सौकन्यं चाथ शर्यातेः ककुत्स्थस्य
च धीमतः खट्वांगस्य च मांधातुः सौभरेः सगरस्य च २३ रामस्य कोशलेंद्रस्य चरितं किल्बिषापहं निमे
रंगपरित्यागो जनकानां च संभवः २४ रामस्य भार्गवेंद्रस्य निःक्षत्रीकरणं भुवः ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च २५

तिः अनेनैव नरकनिवर्त्तकमजामिलोपाख्यानं गृहीतं ततः पराचीनं षष्ठार्थमाह दक्षजन्मेति १७ सप्तमार्थमाह पुत्रयो
श्चेति १८ अष्टमार्थमाह मन्वंतरानुचरितमिति क्वचित्क्रमस्याप्यनुक्तिः व्युत्क्रमोक्तिश्च भक्तिरसानुकूलत्वेनेति द्रष्टव्यं
नवमार्थमाह राजवंशेति २२ सोमभरतस्यैलस्य चरितं वंशादि १

वं.श्रा

तत्सुतस्य च भीष्मस्य २६ दन्नामाध्यमाह तस्य कर्माणीति पूतनाया असुसहितस्य तत्पयसः पानं २८ सहभ्रातुः सत्सखस्य २९ यज्ञाभिषेकं यज्ञपुजाअभिषेकश्च तयोर्द्वंद्वैकं ३२ ३३ द्विषतः शत्रून्प्रमथ्य ३५ ३६ ये स्त्रां वरादयस्तेषां ३८

दोष्यंतेर्भरतस्यापि शंतनोस्तत्सुतस्य च ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोनुकीर्तितः २६ यत्रावतीर्णोभगवान्कृष्णाख्यो जगदीश्वरः वसुदेवगृहे जन्म ततोवृद्धिश्च गोकुले २७ तस्य कर्माण्युदाराणि कीर्तितान्यसुरद्विषः पूतनासुपयःपानं शकटोच्चाटनं शिशोः २८ तृणावर्तस्य निष्पेषस्तथैव बकवत्सयोः धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः २९ गोपानां च परित्राणं दावाग्नेः परिसर्पतः दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं व्रतचर्यानुकन्यानां यत्र तुष्टोच्युतोव्रतैः प्रसादोयज्ञपत्नीभ्यो विप्राणां चानुतापनं ३१ गोवर्द्धनोद्धरणं च शक्रस्य सुरभेरथ यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ३२ शंखचूडस्य दुर्बुद्धेर्वधोरिष्टस्य केशिनः अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ३३ व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः गजमुष्टिकचाणूरकंसादीनां तथा वधः ३४ मृतस्यानयनं सूनोः पुनः सांदिपिनेर्गुरोः मथुरायां निवसता यदुचक्रस्य यत्प्रियं ३५ कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः जरासंधसमानीतसैन्यस्य बहुशो वधः ३६ घातनं यवनेंद्रस्य कुशस्थल्या निवेशनं आदानं पारिजातस्य सुधर्मायाः सुरालयात् ३७ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनं ३८ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् चैद्यपौंड्रकशाल्वानां दंतवक्रस्य दुर्मतेः ३९ शंबरो द्विविदः पीठो मुरः पंचजनादयः महात्म्यं च वधः स्तेषां वाराणस्याश्च दाहनं ४० भारावतरणं निमित्तिं कृत्य पांडवान्

भमे

एकादशार्थमाह विप्रशापेति धर्मविनिर्णयः वर्णाश्रमधर्मनिश्चयः ४० मर्त्यपरित्यागः मनुष्यत्वस्यांतर्द्धानं
४१ द्वादशार्थं युगेति युगलक्षणं तदनुरूपा वृत्तिश्चेत्यर्थः त्रिविधाप्राकृतिकीनैमित्तिकीनित्या चेति ४२

४४

विप्रशापापदेशेन संहारः स्वकुलस्य च उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ४० यत्रात्मविद्याह्यखिला
प्रोक्ता धर्मविनिर्णयः ततो मर्त्यपरित्यागः आत्मयोगानुभावतः ४१ युगलक्षणवृत्तिश्च कलौस्त्रीणांमुपप्लु नृणां
वः चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ४२ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः शाखाप्रणय विष्णुरा
नमृषेर्मार्कंडेयस्य सत्कथा ४३ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ४४ इति चोक्तं द्विजाश्रे
ष्ठाः यत्पृष्टोहमिहास्मि वः लीलावतारकर्माणि कीर्त्तितानीह सर्वतः ४५

ऋषेर्व्यासस्य सूर्यस्य विन्यास इत्यर्थः ४३ इति चोक्तमिति चकारादन्यदपि वः युष्माभिरिह यत्
पृष्टोस्मि तदुक्तमिति किमेवं नानार्थकथनेन तत्राह लीलेति सर्वतस्तत्तदर्थकीर्त्तनद्वारेणेत्यर्थः ४५

४४

नि

तत्कीर्तनेनापि किमित्यपेक्षायां तत्फलमाह द्वाभ्यां पतितः कूपादिषु स्खलितः सोपानादिषु आर्त्तः दुःखितः
क्षुत्त्वा क्षुतं कृत्वा विवशोपि ४७ संकीर्त्यमानः यद्वा श्रुतोनुभावो यस्य सः पुंसां चित्तं प्रविश्य निःशेषं दुःखं
विधुनोतीति हेतिसतामनुभवं प्रमाणयति अर्को गिरिगुहादि ध्वांतं न निवर्त्तयतीत्यपरितोषे दृष्टांतां
तरमाह अतिवातोऽभ्रमिवेति ४८ हरिसंकीर्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमिति

पतितस्खलितोवार्त्तःक्षुत्त्वावाविवशोगृणन् हरयेनमइत्युच्चैर्मुच्यतेसर्वपातकात् ४७ संकीर्त्यमा
नोभगवाननंतःश्रुतानुभावोव्यसनंहिपुंसां प्रविश्यचित्तंविधुनोत्यशेषं यथातमोर्कोऽभ्रमिवातिवातः ४८
मृषागिरस्ताह्यसतीरसत्कथानकथ्यतेयद्भगवानधोक्षजः तदेवसत्यंतदुहैवमंगलंतदेवपुण्यंभगव
द्गुणोदयं ४९ तदेवरम्यंरुचिरंनवंनवंतदेवशश्वन्मनसोमहोत्सवं तदेवशोकार्णवशोषणंनृणांयदुत्त
मश्लोकयशोनुगीयते ५०

प्रपंचयति मृषागिर इति चतुर्भिः मृषागिरः मिथ्यावाचः असतीः असत्यअसत्तां कथा याः श्रुताः
यत् यासु उत्तमश्लोकस्य यशोनुगीयत इति यत् तदेव सत्यं तदेव हि मंगलं ह इति हर्षे भगवद्गुणाना
मभ्युदयो यस्मात् ४९ नवंनवं यथा भवति तथा रुचिरं रुचिरं रुचिप्रदं महानुत्सवो यस्मात् ५०

चित्राणि यद्यानि यस्मिन् तदपि जगत्पवित्र यती लितथा तद्धरेर्यशो न गृणीत न वर्णयेत् तद्वयः ध्वांक्षतीर्थं काक
तुल्यं नराणां इतिरम्यानं न तु हंसैः ज्ञानिभिः सेवितं तत्र हेतुः यत्रेति ५१ स वाग्विसर्गः स च वाच्यः प्रयोगः जन
ताघसंप्लवः जनसमूहस्य घनानाशकः यद्यस्मात्तान्येव अन्यैः कीर्तितानानि शृण्वंति श्रोतरि सति गायंति नो चे
त्स्वयमेव गृणंति ५२ इदानीं ज्ञानकर्मादिरादपि भगवत्कीर्तनादिष्वेवादरः कर्तव्यस्त्याह नैष्कर्म्यं आत्मतत्त्वप्र त
काशकं यज्ज्ञानं यतो निरंजनं उपाधिनिवर्तकं तदप्यच्युतभक्तिवर्जितं चेन्न शोभते नापरोक्षपर्यंतं भवतीत्यर्थः

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवो
मलाः ५१ स वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि यच्छृण्वं
ति गायंति गृणंति साधवः ५२ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं कुतः पुनः शश्वदभद्रमी
श्वरे न चार्पितं कर्म यदप्यनुत्तमं ५३ यशः श्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु अविस्मृतिः
श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ५४

ईश्वरे न चेदर्पितं तर्हि यदनुत्तमं सर्वोत्तममपि कर्म तदपि पुनः कुतः शोभते यतः शश्वत्साधनकाले फलकाले च
अभद्रं दुःखात्मकं ५३ वर्णाश्रमाचारादिषु यः परो महान्परिश्रमः स यशोयुक्तायां श्रियामेव कीर्तिः संप
त्तिश्च न केवलं परमपुरुषार्थ इत्यर्थः गुणानुवादादिभिः स्तु श्रीधरपादपद्मयोरविस्मृतिर्भवति ५४

ततः किमत आह अविस्मृतिरिति क्षिणोति नाशयति ५४ अथेदानीं श्रोतृनात्मानं चाभिनंदन्नाह यूयमिति द्वा
भ्यां हे द्विजाग्र्याः यद्यस्मादान्यंतःकरणे श्रीनारायणं आनिवेश्य शश्वद्भजत सं भावनायां लोट् अतो भूरिभागाः
बहुपुण्याः कथंभूतं अखिलात्मभूतं सर्वांतर्यामिणं अत एव देवं सर्वोपास्यं अदेवं नरवोन्योयस्य तं कुतः ईशं यद्वा
यस्माद्यूयं भूरिभागाः तपआदि संपन्नाः ततो नारायणं भजतेति विधिः ५५ मे मया श्रुतं ५६ एतत्पुराण कीर्त्त

अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति च सत्वस्य शुद्धिं परमां च भक्तिं ज्ञानं च विज्ञानवि
रागयुक्तं ५४ यूयं द्विजाग्र्याः बत भूरिभागाः यच्छश्वदात्मन्यखिलात्मभूतं नारायणं देवमदेवमीशमजस्रभा
वा भजताविवेश्य ५५ अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे परमर्षिवक्त्रात् प्रायोपवेशे नृपतेः परिक्षितः
सदस्यृषीणां महतां च शृण्वतां ५६ एतद्वः कथितं विप्रा कथनीयोरुकर्मणः माहात्म्यं वासुदेवस्य सर्वाशुभवि
नाशनं ५७ य एवं श्रावयेन्नित्यं यामं क्षणमनन्यधीः श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेव सः ५८ द्वादश्या
मेकादश्यां वा शृण्वन्नायुष्यवान्भवेत् पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ५९ पुष्करे मथुरायां च द्वारवत्यां
यतात्मवान् उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ६० देवताः मुनयः सिद्धा पितरो मानवो नृपाः यच्छंति का
मान् गृणतः शृण्वतो यस्य कीर्तनात् ६१ ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविंदते मधुकुल्याः घृतकुल्याः पयःकुल्याश्च

नादिफलं प्रपंचयितुं आह एतद्द्वादशभिः ५७ यामं क्षणं वेत्यर्थः आत्मानमेव साक्षात् पुनाति न तु स्नानादिवद्दे
हमात्रं ५८ ५९ ६० ६१ अगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविंदते तत्फलमेतां पठित्वा अनुविंदत इति ६२

त्वं

या

पाठ्ये

किंच प्रोक्तमिति ६२ राजन्यउदधिमेखलां पृथ्वीं संधिरार्षः ६४ अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह कलि मलानां संहतिं समूहं कालयति विनाशयति तत्तथा इतरत्र शास्त्रांतरे ६५ शास्त्रप्रतिपादितं भगवंतं नमस्करोति तमि तिद्वाभ्यां जगदुदयस्थिति संयतास्तानो उजाताय शक्तयो यस्य तं कपतिभिर्वैरपि दुरवसितं अज्ञातः स्तवः स्तोत्रं यस्य तं ६६ उपचिताभिरुद्रिक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकार तन्मात्ररूपाभि आत्मन्येवो प[...] चितेस्थिरजं

४६

पुराणसंहितामेतामधीत्य प्रयतो द्विजाः प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६१ विप्रोऽधीत्याप्नुयात्प्रज्ञां राजन्योदधि मेखलां वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ६२ कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्य भीक्ष्णं इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसंगैः ६४ तमहमजमनंतमात्मतत्त्वं जगदुदयस्थिति संयमात्मशक्तिं द्युपतिभिरजशक्रशंकराद्यैर्दुरवसितस्तवमच्युतं नतोऽस्मि ६५ उपचितनवशक्तिभिः स्वआत्मन्य पचितस्थिरजंगमालयाय भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ६६ स्वसुखनिभृतचेतास्त द्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयं व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्यास सूनुं नतोऽस्मि ६८ इति श्रीभागवते महापुराणे द्वादशस्कंधे द्वादशोऽध्यायः १२

गर्भं चालयो यस्य तस्मै भगवते ६७ श्रीगुरुं नमस्करोति स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तोऽन्यस्मि भावो यस्य तथाभूतोऽपि अजितस्य रुचिराभिर्लीलाभिः आकृष्टः सारः स्वसुखगतं स्थैर्यं यस्य सः दीपं परमार्थ प्रकाशं श्रीभागवतं यो व्यतनुत तं नतोऽस्मीति ६८ इति द्वादशे टिकायां द्वादशोऽध्यायः १२

४६

त्रयोदशे पुराणानां संख्या माहयथाक्रमं॥ दानं दानस्य माहात्म्यं श्रीमद्भागवतस्य च॥१॥

सर्वपुराणसंख्यादीनुपवर्णयिष्यन्तस्तत्प्रतिपाद्यं देवं प्रणमति यमिति सर्वैर्वेदैश्च स्तुन्वंति स्तुवंति उपनिषच्छब्दस्याकारांत त्वं छंदोरोनुध्येन ध्यानेनावस्थितं निश्चलं तद्गतं यन्मनस्तेन यस्यांतं न विदुः सुरासुरगणाः १ क्षीरोदमथनादौ दुर्धरमेव धर्तुं धारयितुं कूर्मावतारमनुस्मरन्नाशिषं प्रार्थयते पृष्ठे भ्राम्यत् अमंदं गरिष्ठो मंदरगिरिस्तस्य ग्रावाणस्तेषामग्राणि तैः कंडूयनात् तेन सुखेन निद्रालोः निद्राशीलस्य श्वासानिलानां संस्काराः स्तेषां तेषां कलाः लेशाः तदनुवर्तनवशाज्जलनिधेरंभसां यातायातं नविश्राम्यति ननु समुद्रक्षोभादेवैतत्सर्वं तत्राह वेलायाः क्षोभस्तस्य निभेन मिषेण २

ना

मा

न

स्का

स्तत उवाच यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः १ पृष्ठे भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पांतु वः यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनांभसां यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यति २ पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ३ ब्राह्मं दश सहस्राणि पाद्मं पंचोनषष्टि च श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकं ४ दशाष्टौ श्रीभागवतं नारदं पंचविंशति मार्कंडं नव वाह्नं च दशपंच चतुःशतं ५ चतुर्दश भविष्यं स्यात्तथा पंचशतानि च दशाष्टौ ब्रह्मवैवर्तं लिंगमेकादशैव तु ६ चतुर्विंशति वाराहमेकाशीतिसहस्रकं स्कांदं शतं तथा चैकं वामनं दश कीर्तितं ७

२

पुराणसंख्यास्तासां संभूतिं समाहारं च अस्य तु श्रीभागवतस्य वाच्यं विषयं प्रयोजनं च दानं च तस्य पाठादेश्च महात्म्यं च निबोधत ३ चतुर्विंशति सहस्राणि त्रयोविंशति सहस्राणि शैवकं शिवपुराणं वाह्नं तु अग्निपुराणं दशपंचसहस्राणि चत्वारि शतानि च ५ चतुर्विंशति वाराहं स्कांदं शताधिकैकाशीतिः ६० वामनं दशसहस्राणि ७ सौपर्णं गारुडं एकोनविंशत् एकोनविंशतिः

सौपर्णं गरुडपुराणं एकोनविंशात् एकोनविंशतिः ८ माहाभारतं त्वितिहासः रामायणं च ऋषिभिर्प्रोक्तं काव्यं अतः पु
राणानां संदोहः समूहश्चतुर्लक्षसंख्याकः एवं इदानीमस्य वाच्यं प्रयोजनादीन्दर्शयितुमाह तत्रेत्यादिना ९ १०
हरिलीलाकथानां व्रातः स एव अमृतं तेनानंदिताः संतः सुरा अभयेन तत् ११ तन्निष्ठं तद्विषयं १२ प्रोष्ठपद्यां भाद्र

४७

कौर्म्यं स्यात् द्वादशाख्यातं मात्स्यं तत्तु चतुर्दशं एकोनविंशं सौपर्णं ब्रह्माण्डं द्वादशैव तु ८ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः
तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ९ इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे स्थिताय भवभीताय कारुण्यात्संप्रका
शितं १० आदिमध्यावसानेषु वैराग्याख्यानसंयुतं हरिलीलाकथाव्रातामृतानंदितसत्सुरं ११ सर्ववेदांतसा
रं यद्ब्रह्मात्मैकत्वलक्षणं वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनं १२ प्रोष्ठपद्यां पौर्णिमास्यां हेमसिंहसमन्वितं द
दाति यो भागवतं स याति परमां गतिं १३ राजंते तावदन्यानि पुराणानि सतां गणे यावद्भागवतं नैव श्रूयतेऽमृतसागरं १४
सर्ववेदांतसारं हि श्रीमद्भागवतमिष्यते तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् १५ निम्नगानां यथा गंगा
देवानामच्युतो यथा वैष्णवानां यथा शंभुः पुराणानामिदं तथा १६ श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां
प्रियं यस्मिन्पारमहंस्यमेव ममलं ज्ञानं परं गीयते यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्व
न्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः १७

पद्यां हेमसिंहसमन्वितं स्वर्णसिंहासनोरूढं १३ तद्रस एवामृतं तेन तृप्तस्य निर्वृतस्य १५ १६ पारमहंस्यं प
रमहंसैः प्राप्यं नैष्कर्म्यं सर्वकर्माभावः परमः भक्त्या तच्छ्रवणादिपरो मुच्यते १७ श्रीरामकृष्णगोपाल

४७

श्रीमद्भागवतसंप्रदायप्रवर्त्तकरूपेण भगवद्ध्यानलक्षणं मंगलमाचरति कस्मै ब्रह्मणे अतुलः असमः भाग
वतरूपः पुरा कल्यादौ तद्रूपेण ब्रह्मरूपेण तद्रूपिणा नारदरूपिणा योगींद्राय तदात्मना शुकरूपेण तत्परं स
त्यं श्रीनारायणाख्यं तत्त्वं धीमहीति १९ गायत्र्यैव यथोपक्रममुपसंहरन्नायमन्याख्या ब्रह्मविद्येयमिति दर्शय
तीत्तामेव देवतारूपेण गुरुरूपेण च प्रणमति नमईति व्याचचक्षे व्याख्यातवान् २० श्रीभावार्थदीपिकामेतां

भुकाय

ध्या्यो

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणे योगींद्राय तदात्म
नाथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि १९ नमस्तस्मै भगवते वासुदेवाय सा
क्षिणे य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे २० योगींद्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे संसारसर्पदष्टं
यो विष्णुरातममूमुचत् २१ भवे भवे यथा भक्तिः पादयोस्तव जायते तथा कुरुष्व देवेश नाथस्त्वं मे यतः प्रभो २२
नामसंकीर्त्तनं यस्य सर्वपापप्रणाशनं प्रणामो दुःखशमनः तं नमामि हरिं परं २३ इति श्रीभागवते महा
पुराणे द्वादशस्कंधे सूतोक्त त्रयोदशोऽध्यायः १३ श्रीकृष्णार्पणमस्तु शुभं भवतु रामराम ७७

भगवद्भक्तवत्सलां श्रीपरानंदपदांभोजभृंगाः श्रीश्रीधरोऽकरोत् स्वबालचपलालापैः स्वलीलापरिवर्तितैः प्री
यतां परमानंदहरिः श्रीसद्गुरुः स्वयं श्रीपरमानंदसंप्रीत्यै गुरुं भागवतं मया विरतं तन्मतेनेदमाख्यानं नतु सन्म
तिवैभवात् २३ इति भावार्थदीपिकायां श्रीधरस्वामीविरचितायां द्वादशस्कंधे त्रयोदशोऽध्यायः १३ ७

न

४२

[OrderDescription]
,CREATED=17.10.19 13:39
,TRANSFERRED=2019/10/17 at 13:51:24
,PAGES=100
,TYPE=STD
,NAME=S0002059
,Book Name=M-671-SHRIMADBHAGWAT BHAVARTH DIPIKA TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF

FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF

FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF

FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,